गीतगोवि०
अतिवकम०

प्रलयेत्यादि जगदीशहरत्यनाम्॥ अस्य गीतस्य मालवरागः तच्छन्दसा माह नितम्बिनी चुम्बितवक्त्रपद्मः शुकद्युतिः कुण्डलवान् प्रमत्तः संकेतशालां प्रविशन्निशायां सोमालवरागराजः॥१॥ वेदमुद्गमाभिघातेन रूपकः कथितोऽधुनादृष्टः हे केशव धृतं मीनशरीरं येनोद्धरणार्थं येन हे जगदीश हे हरे सर्वोत्कर्षेण वर्तस्व कस्मादित्यत आह त्वं प्रलयपयोधिजले कल्पान्तसमुद्रजले वेदं धृतवानसि कथमखेदं। अपरिश्रमं यथा स्यात् पुनः कथं विहिते निर्मिते वहित्रचरित्रं समुद्रस्य नौकाकारेणैवोपशोभितं यत्र क्रियायां॥१॥ क्षितिरिति हे केशव हे हरे जय तव पृष्ठे क्षितिः पृथ्वी तिष्ठतीत्यन्वयः कथंभूते पृष्ठे अतिविपुलतरे अतिक्रान्तो विपुलतरः प्रयोधिपे न पुनः कथंभूते पृष्ठे अतिविपुलतरे अतिक्रान्तो विपुलतरः पयोधिपे न पुनः कथंभूते धरणया पृथ्व्या धरणो नवहनेन न पत्कि[illegible] तरकेपिं[illegible] नगरी[illegible]॥२॥ वसति

प्रलयपयोधिजले धृतवानसि वेदं विहितवहित्रचरित्रमखेदम्। केशव धृतमीनशरीर जय जगदीश हरे॥१॥ क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे धरणिधरणकिणचक्रगरिष्ठे। केशव धृतकच्छपरूप [illegible] जय जगदीश हरे॥२॥ वसति दशनशिखरे धरणी तव लग्ना शशिनि कलङ्ककलेव निमग्ना। केशव धृतशूकररूप जय जगदीश हरे॥३॥ तव करकमलवरे नखमद्भुतशृङ्गं दलितहिरण्यकशिपुतनुभृङ्गम्। केशव धृतनरहरिरूप जय जगदीश हरे॥४॥

हे केशव वेत्यादि पूर्ववत्। धृतं शूकरेन रूपं येन तव दशनशिखरे दन्ताग्रभागे धरणी पृथ्वी लग्ना संबद्धा वसति तत्र दृष्टान्तः शशिनि चन्द्रे निमग्ना अन्तःस्थिता कलंककलेव कलंकरेखेव॥३॥ तवेति हे धृतनरहरिरूप धृतं नरहरिरूपं येन तत्संबोधने तव करकमलवरे हस्तपद्मश्रेष्ठे नखमुत्तीत्यध्याहारः कथंभूतं नखं अद्भुतशृङ्गं अद्भुतमाश्चर्यकारकं शृङ्गमग्रभागो यस्य अद्भुतत्वे हेतुमाह दलितो विदारितः हिरण्यकशिपोर्दैत्यस्य तनुरेव भृङ्गो भ्रमरो येन अन्यत्र भ्रमरेण कमलं दश्यते इह तु वैपरीत्येनेत्याश्चर्यम्॥४॥

॥२॥

वाग्देवतेति॥ जयदेव कविरेतं प्रबन्धं कृष्णकेलिकथाप्रतिपादकं करोतीत्यन्वयः कथंभूतो जयदेव कविः वाग्देवताचरितचित्रितचित्तसद्मा वाग्देवतायाः सरस्वत्याश्चरितेन
वचनरचनाविशेषेण चित्रितं मण्डितं चित्तसद्म मनोगृहं यस्य सः पुनः कथंभूतः पद्मावत्याः लक्ष्म्याश्चरणयोश्चारणो न संवाहने न चक्रवर्ती नृपश्रेष्ठः ... लक्ष्मीसेवया हि
कवीनां च प्राप्तिरिति कथंभूतं प्रबन्धं श्रीवासुदेवेति श्रीराधारूपा वासुदेवः श्रीकृष्णः तयोः रतिकेलिस्तुतकौतुककथने न समेतं युक्तं॥२॥ अथ कविर्निजग्रन्थप्रयोजनमाह
यदीति हे कृष्णभक्त ... यदि जयदेवसरस्वतीं शृणु इत्यन्वयः यदि मो हि हरिस्मरणे कृष्णचिन्तने सरसं सानुरागं तव मनोऽस्तीत्यन्वयः अध्याहारः यदि यदि हि विलासकलासु
विल... रासे राधाकृष्णविलासे या ... कलासु कुतूहलमस्ति कथंभूतां जयदेवसरस्वतीं मधुरा सरसा अर्थतः कोमला शब्दतः अतः कान्ता मनोहराः पदावली पद

वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्ती॥ श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रब
न्धम्॥२॥ यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम्॥ मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम्॥३॥ वाचः
पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिराम्॥ जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः ...॥ शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगो
वर्द्धनस्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः॥४॥ गौरमालवरागे रूपकताले॥५॥

सद्भावो यस्याः तां॥३॥ कविरन्यग्रन्थेभ्यो मद्ग्रन्थे बहवो गुणाः सन्तीति द्योतयन्नाह॥ वाच इति उमापतिधरः कविर्वाचः वचनानि परं पल्लवयति विस्तारयति न तु
गुणादिकं संदर्भशुद्धिमर्थतः शब्दतश्च ग्रन्थनादि शुद्धिं जयदेव एव परं जानीते नान्य इत्यर्थः शरणः कश्चिद्दुरूहद्रुतेर्विषयस्य ग्रन्थस्य शीघ्रोच्चारणात्
श्लाघ्यः स्तुत्यः शृङ्गारेति शृङ्गारोत्तराणि शृङ्गारप्रधानानि सन्ति उत्कृष्टानि प्रमेयानि व्याख्यानानि तेषां रचनैः प्रबन्धैः आचार्यगोवर्द्धनस्पर्द्धी कोऽपि न वि
श्रुतः आचार्यगोवर्द्धनकविः शृङ्गारप्रधानमेव ... धोयी नामा कविः क्ष्मापतिः ... श्रुतिधरः श्रुत्वा श्रवणमात्रेणोपधारयति न तु
नरर्थादिग्रहणे प्रवीण इत्यर्थः राजपदेन म...ह... कारकथनं कविरधुना भक्तानुग्रहार्थं विघ्नाभावार्थं दशावतारवर्णनमाह॥५॥

गीतगोविन्द०
वृत्ति जक०

निन्दसीति हे धृतबुद्धशरीर धृतं बुद्धावतारं हे सदयहृदय दयासहितान्तःकरण अहह इति खेदानुवादे यागांबालं यज्ञविधेः अनुविधानस्य श्रुतिजातं वेदः
समूहं निन्दसि दूषयसि कथंभूतं श्रुतिजातं दर्शितः प्रतिपादितः पशूनां घातो वधो यत्र ॥९॥ म्लेच्छेति हे धृतकल्किशरीर धृतकल्क्यवतार त्वं म्ले
च्छनिवहनिधने म्लेच्छसमूहमारणे निमित्तं किमप्यनिर्वचनीयं करवालं खड्गं कलयसि कथंभूतं करवालं धूमकेतुमिव आत्यन्तिकतारका

॥३॥

निन्दसि यज्ञविधेरहह श्रुतिजातं सदयहृदयदर्शितपशुघातं केशव धृतबुद्धशरीर जय जगदीश हरे ॥९॥ म्लेच्छनि
वहनिधने कलयसि करवालं धूमकेतुमिव किमपि करालम् ॥ केशव धृतकल्किशरीर जय जगदीश हरे ॥१०॥ श्रीजयदेव
कवेरिदमुदितमुदारं शृणु सुखदं शुभदं भवसारम् केशव धृतदशविधरूप जय जगदीश हरे ॥११॥

2

पातमिव करालं भयानकं धूमकेतुरग्निः ॥१०॥ श्रीजयदेवेति हे धृतदशविधरूप धृतदशप्रकाररूप श्रीजयदेवकवेरिदमुदितं भा
षितं शृणु आकर्णयेति भक्तानां प्रत्युक्तिः कीदृशमुदारं मनोहरं सुखदं सुखप्रापकात् शुभदं कल्याणदायकं भवसारं संसारे धनरूपम्
॥११॥ उक्तानवतारान् पुनः संक्षेपात्कीर्तयति ॥

छलयसीति धृतवामनरूप येन हेऽद्भुतवामन आश्चर्यहेतुकवामन त्वं विक्रमणे पादविक्षेपे कर्त्तव्ये बलिमसुरं छलयसि वंचयसि कीदृशस्त्वं इति संबोधनं पदेति पदनख नीरेण पदनखाग्रसंबन्धिजलेन गंगारूपेण जनितं कृतं जनपावनं लोकपावित्र्यं येन ॥५॥ क्षत्रियेति हे धृतभृगुपतिरूप धृतपरशुरामरूप त्वं क्षत्रियरुधि रमये पयसि जगत्स्नपयसि इत्यन्वयः क्षत्रियशोणितविकारे जले जगत्स्नपयसि स्नानं कारयसि स्नाने फलमाह कथंभूतं जगत् अपगतपापं गतकल्म षं पुनः कथंभूतं शमितभवतापं दूरीकृतसंसारतापं ॥६॥ वितरसीति हे धृतरामशरीर त्वं रणे संग्रामे दशमुखमौलिबलिं रमणीयं रावणमस्तकोपहारं दिक्षु

छलयसि विक्रमणे बलिमद्भुतवामन पदनखनीरजनितजनपावन केशव धृतवामनरूप जय जगदीश हरे ॥५॥ क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमितभवतापम् ॥ केशव धृतभृगुपतिरूप जय जगदीश हरे ॥६॥ वितरसि दिक्षु रणे दिक्पतिकमनीयं । दशमुखमौलिबलिं रमणीयं केशव धृतरामशरीर जय जगदीश हरे ॥७॥ वहसि वपुषि विशदे वसनं जलदाभम् हलहतिभीतिमिलितयमुनाभं केशव धृतहलधररूप जय जगदीश हरे ॥८॥ ॥

दिशासु वितरसि कीदृशं दिक्पतिकमनीयं इन्द्रादीनां काम्यमिच्छाविषयमित्यर्थः रमणीयं मनोहरं दशदिक्षु दशाशानात ॥७॥ वहसीति हे धृत हलधररूप धृतबलभद्ररूप त्वं वपुषि वसनं वहसि धारयसि कथंभूते वपुषि विशदे शुभ्रे कथंभूतं वसनं जलदाभं मेघसदृशं पुनः कथंभू तं हलहतिभीत्या संगत्याथान भये न मिलिता उपस्थिता यमुना तद्वदाभा दीप्तिर्यस्य भयेनातिश्यामलं भवति ॥८॥

॥४॥

व्रजवनितामनमोहनकृतरोहनए। नन्दितनन्दनिकेतजयजयदेवहरे।।७॥

हे दिनमणिमण्डलमण्डनसूर्यमण्डलालंकारभूत हे भवखण्डन भक्तानां संसारनाशक हे मुनिजनमानसहंस मुनिजनानां मानसे मनसि हंस इव मानसे सरसि हंसो ऽसि जयजयेति पूर्ववत् ॥२॥ कालियेति कालियनाम्नः सर्पस्य गंजनो हंसनजनरंजन भक्तरंजक ॥ यदुकुलेति यादवकुलकमलसूर्य ॥३॥ मधुमुरेति मधुमुरनरकसंसोकानां दैत्यानां नाशक गरुडासन गरुडस्थ आसनं यस्य सुरकुलेति सुरकुलानां देवसमूहानां केलिः क्रीडायाः सुरतस्येत्यावत् निदान आदिकारण ॥४॥ अमलेति अमलकमलवत् निर्मलपद्मपत्रवत् लोचने यस्य भवमोचनेति भवमोचन संसारभंजक त्रिभुवनमेव भवनं गृहं तत्र निधानमिव निधि

नर   धृ१

दिनमणिमण्डलमण्डनभवखण्डनए मुनिजनमानसहंसजयजयदेवहरे ॥२॥ कालियविषधरगंजनजनरंजनए ॥ यदुकुलनलिनदिनेशजयजयदेवहरे ॥३॥ मधुमुरनरकविनाशनगरुडासनए ॥ सुरकुलकेलिनिदानजयजयदेवहरे ॥४॥ अमलकमलदललोचनभवमोचनए ॥ त्रिभुवनभवननिधानजयजयदेवहरे ॥५॥ जनकसुताकृतभूषणजितदूषणए ॥ समरशमितदशकण्ठजयजयदेवहरे ॥६॥ अभिनवजलधरसुन्दरधृतमन्दरए ॥ श्रीमुखचन्द्रचकोरजयजयदेवहरे ॥७॥ तवचरणे प्रणतावयमितिभावयए ॥ कुरु कुशलं प्रणतेषुजयजयदेवहरे ॥८॥ श्रीजयदेवकवेरिदंकुरुतेमुदए ॥ मंगलमुज्ज्वलगीतंजयजयदेवहरे ॥९॥

धि ॥५॥ जनकेति जनकसुतायाः कृतभूषण अलंकार जितदूषण जितदूषण जितपाप ॥ समरे संग्रामे शमितो मारितो दशकण्ठो रावणो येन ॥६॥ अभिनवेति नवमेघसुन्दर धृतमन्दर धृतः मन्दराचलः श्रीमुखचन्द्रे चकोर इव ॥७॥ तवेति हे देव तव चरणे प्रणता वयं सर्वे इति भावय जानीहि ॥ ... भूतमिदं मंगलं उज्ज्वलगीतं नानानुरागभेदेन रम्यं गीतं गानं यस्मिन् ॥९॥

१३

वेदानिति तुभ्यं कृष्णाय नमोऽस्त्वित्यन्वयः कथंभूताय कृष्णाय वेदानुद्धरते मीनरूपेण पुनः जगन्निवहते धारयते कूर्मरूपेण भूगोलं पृथ्वीचक्रं उद्बिभ्रते उ
द्धारयते वराहरूपेण दैत्यं हिरण्यकशिपुं दारयते नरसिंहरूपेण बलिं दैत्यं छलयते वंचयते वामनरूपेण क्षत्रक्षयं क्षत्रियनाशं कुर्वते परशुरामरू
पेण पौलस्त्यं रावणं जयते दाशरथिरूपेण हलं लांगलं कलयते धारयते बलभद्ररूपेण कारुण्यं दयामातन्वते विस्तारयते बुद्धरूपेण म्लेच्छान्
म्लेच्छजातीन् मूर्च्छयते नाशयते कल्क्यवतारेण अतः दशधाकृतिकृते दशविधरूपधारिणे ॥१॥ कविरिदानीं गुर्जरीरागे

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ॥ पौलस्त्यं जयते हलं कलयते
कारुण्यमातन्वते म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥१॥ गुर्जरीरागे प्रतिमठताले ॥ श्रितकम
लाकुचमण्डल धृतकुण्डल ए ॥ कलितललितवनमाल जय जयदेव हरे ॥१॥

कृष्णं स्तौति रागलक्षणं श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्पयाता श्रुतेः स्वराणां दधती विभागं तंत्रीमुखाद्दक्षिणगुर्जरीयमिति कनमात्र
प्रवृत्तिः साप्तत्रतालेन निरन्तरं प्रतिमठः सशृंगाररसानन्दरागी पठनीयोऽस्तीति हे देवहरे जय जय स्वभक्तपक्षपाते सर्वोत्कर्षेण वर्द्धस्व श्रितेत्यादीनि सप्तसंबो
धनानि दशसु निपदं हे इत्यर्थे श्रितमाश्रितं कमलायाः लक्ष्म्याः कुचमण्डलं स्तनमण्डलं येन हे धृतकुण्डल धृते कुण्डले येन हे कलितललितवनमाल कलिता
धृता ललिता सुन्दरी वनमाला पुष्पदाम येन ॥१॥

लाजितेति ॥ अथ वसन्तरागः रागस्तु तालः ॥ शिखरिणि वेर्ह्यापवरचूडः पुष्पन् पिकं चूतलतां कुर्यात् भ्रमन्मधुराथोलम नंगमूर्तिर्मि[...]तो मतंगे च संततरागः सखि हरिरि
रससरसव[...]सन्ते विहरति युवतिजनेन समं नृत्यति चेति ध्रुवगतपदेनान्वयः हे राधे हरिः कृष्ण इह अस्मिन् मनोहरे वसन्तसमये कौतुकिकामिनीसमूहे न सह न
र्तनं करोति च कीदृशे वसन्ते विरहिजनस्य वियोगिजनस्य दुरन्ते दुःखेनान्तः समाप्तिर्यस्य तादृशे अकृतस्य ले इत्यपेक्षायां सप्तमपद्यस्थितेन वृन्दावनविपिन
प्रान्ते नान्वयः कीदृशे वसन्तसमये ललित इत्यादिना सप्तपदीयपदानि वसन्तसमयविशेषणानि ललिता या मनोहरा या लवंगलता या लवंगशाखा

वसन्तरागे रूपकताले ॥ ललितलवंगलतापरिशीलनकोमलमलयसमीरे ॥ मधुकरनिकरकरंबितकोकिलकूजितकुंजकुटीरे ॥
विहरति हरिरिह सरसवसन्ते ॥ नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ॥१ ध्रुवपदम् ॥ उन्मदमदनमनोरथपथि
कवधूजनजनितविलापे अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे ॥२॥

॥५॥

ताः परिशीलनेन संपर्केण कोमलो मलयगंध मनोहरो मलयसमीरो मलयानिलो यत्र अनेन वायोः सुगंधित्वमन्दत्वशीतलत्वान्युक्तानि । मधुकरेति
मधुकरनिकरेण भ्रमरसमूहेन करंबितेन मिश्रितेन कोकिलेन कूजितः शब्दितः कुंज एव लता गृहमेव कुटीरो स्वल्पकुटी यत्र । उन्मदेति उन्मत्तोऽम
दमदनो हर्षकामो यत्र एवंभूतो मनोरथो यस्य एवंभूतो यः पथिकवधूजनः पान्थस्त्रीजनः तेन जनितः इत्यादितो विलापः प[...] परिदेवनं य
त्र अलिकुलेति अलिकुले भ्रमरसमूहैः संकुलो व्याप्तः कुसुमसमूहः तेन निराकुलो व्याप्तो बकुलानां वृक्षाणां कलापः समूहो यत्र ॥२॥

अथ नाकविः कामोद्दीपकत्वात् वसन्तस्य वर्णनव्याजेन कृष्णक्रीडां वर्णयितुं भक्तान् प्रत्याशिषं ब्रूते पद्मेति मधुसूदनस्य कृष्णस्योरो वक्षःस्थलं वो युष्माकं प्रियमभिलाषम् अनुपूरयतु लिङ्नयः कथंभूतमुरः पद्मायाः लक्ष्म्याः पयोधरतटी स्तनपरिसरस्तस्य परिरंभे नालिंगनेन लग्नं यत्काश्मीरं कुंकुमं केशरं तेन मुद्रितं चिह्नितं ममैवेदं वक्षस्थलं नान्यस्येति भावः पुनः कथंभूतमिव व्यक्तानुरागमिव प्रकटानुरागमिव पुनः कथंभूतं उरः खेलनं खेलन्तिं कुर्वन् योऽनंगः कन्दर्पो लस्य खेदेन प्रस्तोयो यस्तेन स्वेदाम्बुपूरो घर्मजलप्रवाहो यत्र ।१। अथ नायिका विरहोत्कण्ठितायाः राधायाः काचित् सखी सरसं सविलासं वक्ष्यमाणं

पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य॥ व्यक्तानुरागमिव खेलदनंगखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं वः॥१॥ वसन्ते वासन्तीकुसुमसुकुमारैरवयवैर्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम्। अमन्दं कन्दर्पज्वरजनिता चिन्ताकुलतया चलद्बाधां राधां सरसमिदमूचे सहचरी॥२॥

राधां प्रत्यूचे अवदत् कथंभूतां राधां वासन्तीकुसुमसुकुमारैर्माधवीपुष्पसुकोमलैरवयवैरंगैरुपलक्षितां वसन्ते ऋतौ पुनः कथंभूतां राधां कान्तारे दुर्गमे वने भ्रमन्तीं पुनः कथंभूतां राधां बहुविहितं वारंवारं दूती द्वारा कृतं कृष्णानुसंधानं यया पुनः कथंभूतां अमन्दमुत्कटं यथा स्यात् तथा कन्दर्पज्वरेण जनितया उत्पादितया चिन्तया आकुलतया व्याकुलत्वाच्चलन्ती उद्गच्छन्ती बाधा पीडा यस्याः पूर्वोक्तमर्थं गीतेनाह ॥२॥

गीतगोविन्द०
सटीक०

५७३

स्फुरदिति स्फुरन्त्या स्खलन्त्या अतिमुक्तलतायाः वासन्तीलतायाः परिरम्भणेन मुकुलितः पुष्पितः पुलकितो रुक्षः चूतवृक्षो आम्रवृक्षो यत्र कथंभूते वृन्दावनविपिने परिसरपरिगत यमुनाजलपूते परिसरे पर्यन्तभुवि परिगतं व्याप्तं यद्यमुनाजलं तेन पूते पवित्रे ॥ ७ ॥ श्रीजयदेवेति श्रीजयदेवकवेरिदं भणितमुदयति उदयं प्राप्नोति तीत्यर्थः हरिचरणस्मृतिरनुचिन्तनं सारो मुख्यं यत्र सरसं सुमनोहरं वसन्तसमयवनवर्णनं यत्र अनुगतोऽनुकूलो मदनविकारः कामविलासो यत्र ॥ ८ ॥ वियोगिनां दुःसहे वसन्ते वायुर्वर्ण्यते । दहतीति इह वसन्ते गन्धवाहो वायुश्चेतः अर्थाद्विरहिणां दहतीत्यन्वयः किं

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ॥ वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥ ७ ॥ श्रीजयदेवभ ॥ ७ ॥
णितमिदमुदयति हरिचरणस्मृतिसारम् ॥ सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ॥ ८ ॥ दरविदलित
मल्लीवल्लिचञ्चत्परागप्रकटितपटवासैर्वासयन्काननानि ॥ इह हि दहति चेतः केतकीगन्धबन्धुः प्रसरदसमबाण ॥ २४
प्राणवद्गन्धवाहः ॥ ९ ॥

केन दरविदलितायाः ईषद्विकसितायाः मल्लीमल्लिकायाः वल्लीबल्लनायाः चञ्चद्भिः उद्धतैः परागैः पुष्परजोभिः प्रकटितपटवासैः स्फुरत्कृतपटवासचूर्णैः काननानि वनानि वासयन् सुरभीकुर्वन् पुनः कथंभूतः केतकीपुष्पाणां गन्धस्य बन्धुः मित्रं प्रसरन्तो ये असमबाणाः कामस्य बाणाः तेषां प्राणवत् प्राणा इव ॥ ९ ॥

5

म्रगेति मृगमदस्य कस्तूरिकायाः सौरभरभसवशंवदासुरभिः नोत्साहस्यापनतावाप्तिनी नवा नूतना दलमाला पत्रमाला यस्यां ईदृशास्तमालाः पत्रनूतनपत्र
त्तिमालो मृगमदगंधमनुकरोति युवजनानां तरुणजनानां हृदयं विदारयति एवं विधो यो मनसिजः कन्दर्पस्तस्य यानि नखानि तद्वत् रुचिर्द्युतिर्येषां एवं
भूतानां किंशुकानां पलाशपुष्पाणां जालं समूहो यत्र ॥३॥ मदनेति मदनमहीपतेः कामनृपस्य कनकदंडं तद्वत् रुचिर्यस्य एवंभूतः केसरकुसुमवि
कासो नागकेसरप्रादुर्भावो यस्मिन् । मिलितेति मिलिताः शिलीमुखाः भ्रमरा येषु तैः पाटलिपटलैः पाटलाः पुष्पसमूहैः कृतः स्मरतूणविलासः काम

मृगमदसौरभरभसवशंवदनवदलमालतमाले ॥ युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥ ३ ॥ मदनमहीपति
कनकदंडरुचिकेसरकुसुमविकासे ॥ मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ॥ ४ ॥ विगलितलज्जितजग
दवलोकनतरुणाकरुणकृतहासे ॥ विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदंतुरिताशे ॥ ५ ॥ माधविकापरिमलललितेन
वमालिकजातिसुगंधौ ॥ मुनिमनसामपि मोहनकारिणि तरुणाकारणबंधौ ॥ ६ ॥

तूणीरचेष्टितं यत्र ॥ ४ ॥ विगलितेति विगलिता लज्जा यस्य एवं लज्जितस्य जगतः अवलोकनेन दर्शनेन तरुणाकरुणैः तरुणाकरुणवृक्षैः प्रफुल्लिकाशयोगेन कृतो
हासो हास्यं यत्र ॥ विरहीति विरहिनिकृन्तनानि वियोगमारकाणि कुन्तमुखाकृतीनि भल्लमुखाकाराणि यानि केतकिपुष्पाणि तैः दन्तुरिता व्याप्ता आ
शा दिशो यत्र ॥ ५ ॥ माधविकेति माधविकायाः वासन्तीलतायाः परिमलेन गंधेन ललिते न मनोहरे या नवमालिका तस्या नेवारपुष्पाणि तानि अतिस
सुगंधौ मुनिमनसामपि चित्तानाम मोहनकारिणि तरुणाकारणबंधौ ... मिते वृन्दावनविपिने हरिः क्रीडतीत्यन्वयः ॥ ६ ॥

गीतगोविन्द०

मतिलक०

चन्दनेति चन्दनेन मलयजेन चर्च्चितं रेखारेखाकारेणानुलिप्तं नीलं कलेवरं शरीरं यस्य पीतं वसनं वस्त्रं यस्य वनमाला यस्यास्तीति तत्कर्मधारयः पुनः कथंभूतः केलिना क्रीडया चलन्ती मणिकुण्डले मणिकुण्डले ताभ्यां मण्डितं गण्डयुगं यस्य स्मितेन ईषद्धास्येन शालते शोभते तत्कर्मधारयः॥१॥ पीनेति हे सखि काचिद्गोपवधूः गोपाङ्गना पीनपयोधरभारेण विपुलकुचगौरवेण निर्भरं सरागं सानुरागं यथा स्यात्तथा हरिं परिरभ्यालिङ्ग्य उदञ्चितपञ्चमरागं अनु [illegible] नपञ्चमरागोल्लसत्पञ्चमस्वरमपतिगानं करोति कृष्णरागानन्तरं स्वपञ्च

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली॥ हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे॥१॥ पीनपयोधरभारभरेण हरिं परिरभ्य सरागम्॥ गोपवधूरनुगायति काचिदुदञ्चितपंचमरागम्॥२॥ कापि विलासविलोलविलोचनखेलनजनितमनोजम्॥ ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम्॥३॥ कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले॥ चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले॥४॥

॥१॥

6

गायतीत्यर्थः॥२॥ कापीति काचिन्मुग्धवधूर्मनोहरगोपाङ्गना अधिकमतिशयेन मधुसूदनवदनसरोजं कृष्णमुखाम्बुजं ध्यायति चिन्तयति विलासेन विलोलयोश्चञ्चलयोर्विलोचनयोः खेलनेन संचारेण जनितः [illegible] मनोजः कामो येन॥३॥ कापि कपोलतले ति कापि नितम्बवती गोपाङ्गना [illegible] चुचुम्ब चुम्बितवती कथंभूता किमपि काचि

वसन्तवासरागमनं गो॰ दीपकत्वमाह। उन्मीलदिति अमी वसन्तसंबन्धिनो वासराः दिवसाः पथिकैर्मार्गस्थैः विरहिभिः कथंकथमपि केनापि दुः
खेन नीयन्ते कथंभूता वासराः उन्मीलन् प्रकटीभवन् मधुगंध स्वच्छपुष्परसगन्धः [illegible] तत्र लुब्धा ये मधुपा भ्रमरास्तैर्व्याधूताः कंपिता ये चूताङ्कुरा आ
म्राङ्कुरास्तेषु क्रीडन्तां कोकिलानां काकलीकलकलैः सूक्ष्माव्यक्तमधुरध्वनिकोलाहलैः कष्टजनकत्वेनोद्गीर्णः प्रकाशितः कर्णज्वरः श्रवणो
पतापो येषु कथं नीयन्ते इत्यत आह ध्यानेति ध्याने चिन्तने यदवधानं चित्तैकाग्र्यं तेन क्षणं अल्पकालं प्राप्ता या अनुभूता या नायिका
या समागमरसेन संबन्धस्वरूपरसेन उल्लासो हर्षो येषां ते ॥२॥ अनेकेति असौ सखी राधिकां पुनराहेत्यन्वयः कथंभूता सखी आराद्दूरवर्तिना

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ॥ नीयन्ते पथिकैः
कथंकथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥२॥ अनेकनारीपरिरंभसंभ्रम
स्फुरन्मनोहारिविलासलालसम् ॥ मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम् ॥ रामकरीरागे
रूपकताले ॥

तं समक्षं यथा स्यात्तथा कृष्णमुपदर्शयन्ती विषयं कारयन्ती कीदृशं हरिं अनेकनारीणां परिरंभसंभ्रमेणालिंगनेनादरेण स्फुरल्ललितलीलागच्छन् म
नोहारी मनोहारी यो विलासः क्रीडा तत्र लालसं आरसवन्तं पश्चात्कर्मधारयः ॥३॥ अथ मुमेव श्लोकोक्तमर्थमाह रामकरीरागः रागलक्षणं
स्वर्णप्रभा [illegible] हे विलासिनि राधे इह मुग्धवधूनि
करे मनोहरकामिनीसमूहे हरिर्विलसति क्रीडति कथंभूते वधूनिकरे केलिपरे क्रीडातत्परे कथंभूतो हरिः

गीतगोवि०
पति अ०

श्रीजयदेवेति श्रीजयदेवभणितमिदं गीतं शुभानि कल्याणानि वितनोतु वर्द्धयतु अर्थात् भक्तानां कीदृशं गीतं अद्भुतमाश्चर्यकरं केशव
स्य कृष्णस्य केलिरहस्यं श्रीगहर्षोपत्र अद्भुतं कामपत्सर्थासां प्रीत्युत्पादनात् वृन्दावने विपिने वृन्दावननाम्नि वने ललितं नानारसान्वि
तमित्यर्थः यशस्यं यशसः हितं यशस्करमित्यर्थः॥८॥ अथ नाम स्वीराधायै कृष्णकेलिमाधुर्यं पुनः कथयितुमाह विश्वेषामिति हे
सखि राधे मधौ वसन्ते मुग्धो मनोहरो हरिः कृष्णः क्रीडतीत्यन्वयः कथंभूतः मूर्तिमान् शरीरधारी शृंगाररस इव किं कुर्वन् अनुरंजनेना

॥८॥

श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम्॥ वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम्॥८॥ विश्वेषामनु
रंजनेन जनयन्नानन्दमिन्दीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवम् स्वच्छन्दं व्रजसुन्दरीभिरभि
तः प्रत्यंगमालिंगितः शृंगारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति॥९॥

7

नुरागेन विश्वेषां भक्तानां आनन्दं संतोषं जनयन्नुत्पादयन् पुनः किं कुर्वन् इन्दीवरश्रेणी नीलोत्पलमाला तद्वत् श्यामलकोमलैः कुसुमनो
हरैः रंगैरवयवैः अनंगोत्सवं कामहर्षमुपनयन् प्रापयन् पुनः कथंभूतः स्वच्छन्दं स्वेच्छया व्रजसुन्दरीभिर्गोपांगनाभिः अभितः सर्वतोभा
वेन प्रत्यंगं प्रत्यवयवं आलिंगितः गोपीभिरेकदालिंगयोपमायदं प्राप्तं तयालदेवालिंगितमिति भावः यथा यो भवति शृंगारः श्वेतो हासः
प्रकीर्तित इति शृंगारविशेषणात् अप्येतानि पदानि मङ्गलानि लस्मडुः सह तेकारस्यामाह॥९॥

केलीति। काचिद्गोपी केलिकलाकुतुके नर्महेतुना धूर्त्तकारकस्य क्रीडनमपेक्ष्य आह हे तुलाकरा रहसि नाम कृष्णं दुकूले पट्टवस्त्रे विचकर्ष आकृष्टवती कथंभूतममुं यमुनाजलकूले यमुनाजलोपलक्षिते कूले तीरे मंजुलो मनोहरो यो वंजुलस्य कुंजो वेतसलतागृहस्तत्र गतं वर्त्तमानम्॥५॥ करतलेति काचिद्युवतिः गोपांगना हरिणा कृष्णेन प्रशशंसे श्लाघिता रासरसे गोपक्रीडानुरागे सहनृत्यपरा कृष्णसमं कालं नृत्यन्ती। कथंभूते रासरसे करतलयोर्हस्तयोस्तालेन

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले॥ मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले॥५॥ करतलतालतरल
वलयावलिकलितकलस्वनवंशे॥ रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे॥६॥ श्लिष्यति कामपि चुम्बति का
मपि काममपि रमयति रामाम्॥ पश्यति सस्मितचारुपरामपरामनुगच्छति वामाम्॥७॥

चपेटध्वनिना तरलया चंचलया वलयावल्या कंकणपंक्त्या कलितो मिश्रितः कलस्वनो वंशो व्यक्तमधुरशब्दसहितो वंशो वेणुर्यत्र॥६॥ एकस्य कृष्णस्यानेकाभिः स्त्रीभिः कथं क्रीडा जाता इत्याह श्लिष्यतीति। हे राधे श्रीकृष्णः कामपि गोपिकां श्लिष्यति आलिंगति तथा काममपि चुम्बति तथा काममपि रामां रमयति क्रीडयति परां नायिकां सस्मितं चारु सहास मनोहरं यथा स्यात्तथा पश्यति अपरां वामां सुन्दरीं अनुगच्छतीत्यर्थः॥७॥

विहरतीति॥ राधा रहः एकान्ते सखीमुवाच कथंभूता राधा वने वृन्दावने हरौ कृष्णे विहरति सति विगलितनिजोत्कर्षात् ईर्ष्यावशेन गतान्यतः कीदृशे हरौ साधारणप्रणये अन्यगोपीष्वपि प्रेम्णि अतएव क्वचिदपि लताकुंजे लताग्रहे लीना पुनः कथंभूते लताकुंजे गुंजन्मधुव्रतानां भ्रमराणां मंडली समूहेन मुखराणि शिखराणि यस्य तस्मिन् दीनापि ॥१॥ श्लोकोक्तमर्थं गीतेनाह॥ संचरदिति हे सखि मम मनः हरिं स्मरति कथंभूतं हरिं संचरत् अधरसुधामधुरध्वनि...

॥ इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः॥ १॥ विहरति वने राधा साधारणप्रणये हरौ विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः॥ क्वचिदपि लताकुंजे गुंजन्मधुव्रतमंडलीमुखरशिखरे लीना दीनाप्युवाच रहः सखीम्॥ गुर्जरीरागे यतिताले॥ संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशम्॥ चलितदृगंचलचंचलमौलिकपोलविलोलवतंसम्॥ रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासम्॥ ध्रुवपदम्

...न मनोहरेण ध्वनिना मधुरेण मुखरितः शब्दितो मोहननामवंशो येन पुनः कीदृशं चलितेति चलित आवर्जितो दृगंचलः कटाक्षो यस्य चंचलः मौलिः शेखरं यस्य कपोलेगंडस्थले विलोलश्चंचलोवतंसः कर्णाभरणो यस्य सः ततः पश्चात् कर्मधारयः पुनः कीदृशं हरिं इह रासे गोपक्रीडायां विहितविलासं कृतक्रीडं कीदृशं कृतपरिहासं विहितहासम्॥१॥ ध्रुवपदम्॥

अद्योत्संगमिति हे राधे अद्येदानीं वसन्तसमये श्रीखण्डशैलानिलः मलयजपवनः उत्संगे क्रोडे वसन्तो ये भुजंगाः सर्पास्तेषां कवलक्लेशादिव ग्रा सोपद्रवात् पारिवर्त्तिकात् च ईशाचलं हिमाचलं प्रालेयप्लवनेच्छयानुहिनमज्जनेच्छयानुसरति अनुगच्छति किंचित्कं अनुपन्नान्तरे पिकानां गिरो वाणयः स्निग्धरसालमौलिमुकुलानि कोमलचूताग्रभागस्तवककुसुमानि आलोक्य हर्षोदयात् उन्मीलन्ति उद्भवन्ति कथं कुहूः कुहूः इत्याकारेण कलोत्तालाः मधुरध्वनिना उत्ताला प्रकटाः ॥२॥ कविः कृष्णोपक्रमं तत्र श्लोकान् मन्त्राशीर्वचनं

अद्योत्संगवसद्भुजंगकवलक्लेशादिवेशाचलं प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ॥ किंच स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः ॥२॥ रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवामभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया ॥ साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिव्याजादुद्भटचुम्बितः स्मितमनोहारी हरिः पातु वः ॥३॥

ति रासोल्लासेति हरिः कृष्णः वः युष्मान् पातु रक्षतु कथंभूतो हरिः रासोल्लासभरेण गोपक्रीडायां हर्षातिशयेन विभ्रमभृतां शृंगारविलासधारिणीनां आभीरवामभ्रुवां गोपांगनानां अभ्यर्णे समीपे निर्भरं गाढं यथा स्यात्तथा उरो वक्षःस्थलं परिरभ्य आश्लिष्य राधया उद्भटं चुम्बितः यथा स्यात्तथा गीतस्तुतिव्याजात् प्रशंसाछलेन चुंबितः किं कृत्वा त्वद्वदनं सुधामयं अमृतमयं साधु शोभनमिति व्याहृत्य उक्त्वा कथंभूतो हरिः स्मितमनोहारी राधाया उद्भटचुम्बनकौतुकदर्शनात् स्मितेन ईषद्धासेन मनोहर्त्तुं शीलं यस्य ॥३॥ इति श्रीगीतगोविन्दटीकायां नारायणदासविरचितायां

भासमयेति॥ भणिता मयेन समगिनानुरूपे यामकेरतो मनोहराभ्यां कुरङ्गलाभ्यां भणितो॥ लं कृतः गराडः कपोलस्य यस्य पुनः कीदृशं महानामसुरमभीष्ट घनारं पुनः कीदृशं पीतवसनं अनुगता अभिनासुन पोयस्य मनुजा लोकाः सुरा देवा असुरवराः दैत्यवराः नेपरिवाराः परिजना यस्य तं परिजनं प रिवेषं मुहर्ष दो रिति विमुवः॥६॥ विश्वदेति विशदस्कदंवत्ले विमलकदंवतले मिलितमुपस्थितं पुनः कीदृशं कलिकलुषभयं कलिकालजनानपापा स्य भयशमयन्तं नाशयन्तं पुनः कीदृशं मामपि किमपि अनिर्वचनीयं यथा स्यात्तथा तरलं तु कुञ्जन नेमी यया न दृष्ट्या दृष्ट्यामनसा हृदयेन चरमयं तं॥७॥ श्रीजयदेवेति श्रीजयदेवभणितं गीतं भक्तानां हरिचरणस्मरणं प्रतिसंप्रति कलियुगे अनुरूपं योग्यं भवति त्वन्वयः कथंभूतं सुन्दरं म

भासमयमनोहरकुण्डलमण्डितगण्डमुदारम्॥ पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम्॥६॥ विशदकदंब तले मिलितं कलिकलुषभयं शमयन्तं मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तम्॥७॥ श्रीजयदेवभणितमतिसुन्दरमोह नमधुरिपुरूपम्॥ हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपम्॥८॥ गणयति गुणग्राममं भ्रामं भ्रमादपि नेहते वहति च परि तोषं दोषं विमुञ्चति दूरतः। युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां विना पुनरपि मनो वामं कामं करोति करोमि किम्॥१॥ गीरथमा लवरागेणगीयते एकतालीतालेन॥

हरं ... मोहनं मोहनकारकं मधुरिपुरूपं कृष्णस्वरूपं यस्मिन्॥८॥ इदानीं उत्कण्ठितराधायाः कृष्णे गमनवैनस्यो ऽवस्थसनाह गणयतीति हे सखि मन्मनः निश्चितं पुनरप्यधुना कृष्णे कामेन वामं करोति किं करोमि विलम्बो उपायान्तरं नास्तीत्यर्थः युवतिषु गोपीषु वलत्तृष्णे गानाभिलाषे पुनः कीदृशे मां विना विहारि णि क्रीडाशीले कीदृशं मनः ... ... गुणग्रामं समूहं गणयति भ्रमादपि भ्रामं विस्मरणं नेहते पुनरपि यावर्गीतेनतदेवीमाह॥२

चन्द्रकेन विचित्रवर्णेन चिन्हकेन चारूणां शोभनानां मयूरशिखण्डकानां मयूरपिच्छानां मण्डलेन समूहेन वलयिता वलयाकारं वेष्टिताः केशा यस्य अतस्तं प्रचु-
रेणा विस्तीर्णेन पुरन्दरधनुषा इन्द्रधनुषा अनुरंजितो रंजितो मेदुरोऽतिस्निग्धो मुदिरो मेघस्तद्वत् सुवेशः सुन्दरः ॥२॥ गोपेति गोपकदम्बस्य आभीरसमूहस्य
नितम्बवतीनां स्त्रीणां मुखचुम्बनेन लम्भितः प्रापितो लोभो येन पुनः कीदृशं बन्धुजीवमिव बन्धुकपुष्पमिव मधुरः पक्वोऽधरपल्लव ओष्ठपल्लवो
यस्य बन्धुजीवं भाषायां दुपहरि उल्लसितेनोत्कटेन स्मितेन शोभा यस्य तं विपुलेति । विपुलाः बहुलाः पुलकाः रोमोद्गमा याभ्यां ताभ्यां भुजपल्लवाभ्यां बाहु-

स८

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ॥ प्रचुरपुरन्दरधनुरनुरंजितमेदुरमुदिरसुवेशम् ॥२॥ गोपकदम्बनितम्ब-
वतीमुखचुम्बनलम्भितलोभम् ॥ बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ॥३॥ विपुलपुलकभुजपल्लववलयितवल्लव-
युवतिसहस्रम् ॥ करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रम् ॥४॥ जलदपटलचलदिन्दुविनिन्दकचन्दनतिल-
कललाटम् ॥ पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् ॥५॥

भ्यां वलयितं वेष्टितं वल्लवानां आभीराणां युवतिसहस्रं गोपिकावृन्दं येन पुनः कीदृशं करौ च चरणौ च उरश्च तेषां समाहारः करचरणोरस्तस्मिन्
वर्तमानानां मणिगणयुक्तभूषणानां किरणेन दी[illegible]प्त्या विभिन्नं विदारितं तमिस्रमन्धकारो येन ॥४॥ जलदेति पुनः कीदृशं हरिं जलदपटले
मेघसमूहे चलनं संभजत इन्दोश्चन्द्रस्य विनिन्दकं समानं चन्दनकृतं तिलकं यत्र तादृशं ललाटं यस्य अभूत्तादृशं पुनः कीदृशं पीनानां मांसलानां पयो-
धराणां स्तनानां परिसरस्य पर्यन्तस्य अस्य मर्दने निर्दयं [illegible] हृदयं कपाटमिव यस्य ॥५॥

गीतगोविंद॰
प्रतिलकम्॰

अलसेति अलसेन सुरतखेदेन निमीलिते मुद्रिते लोचने यस्याः सा पुलकावल्या रोमांचपंक्त्या ललितौ मनोहरौ कपोलौ यस्य तं श्रमजले[illegible]रतजनितेन कलितं [illegible] कलेवरं यस्याः सा वरमदनमदादुत्तमकामजनितहर्षादतिलोलमतिचंचलं मन्त्र[illegible]मित्यर्थः ॥६॥ कोकिलेति कोकिलानां कलरववद्ध्वनिवत् कूजितं यस्या तया जितो मनसिजतन्त्रविचारः कामशास्त्रविभ्रान्तो येन तं श्लथाः शिथिलाः कुसुमाकुली पुष्पव्याप्ताः कुन्तला यस्यास्तं अलकाः[illegible] नखैर्लिखितः चिह्नितः घनो निविडः स्तनभारो येन ॥७॥ चरणेति चरणयोः पादयोः रणितं

अलसनिमीलितलोचनया पुलकावलिललितकपोलम् ॥ श्रमजलकलितकलेवरया वरमदनमदादतिलोलम् ॥६॥
कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम् ॥ श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ॥७॥ चरणरणितमणिनूपुरया परिपूरितसुरतवितानम् ॥ मुखरविशृंखलमेखलया सकचग्रहचुंबनदानम् ॥८॥ रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम् ॥ निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ॥९॥ श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ॥ सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम् ॥१०॥

शब्दायमानौ मणिनूपुरौ मणिनिर्मितनूपुरौ यस्याः तया परिपूरितं संपूर्णीकृतं सुरतवितानं सुरतसमूहो येन मुखरा शब्दायमाना विशृंखला उन्मुक्ता मेखला कांची यस्याः सा सकचग्रहं केशग्रहसहितं चुंबनदानं यस्य सः ॥८॥ रतिसुखेति रतिसुखसमये सुरतसुखकाले रसालसया प्रीत्यालस्यस्य दरमुकुलितनयनसरोजम् ईषन्मीलितनयनसरोजं निःसहा असमर्था निपतिता तनुलता शरीरलता यस्याः तया मधुसूदनमुदितमनोजं [illegible] [illegible] मानितं [illegible] जयदे[illegible] निधिहि[illegible] नितं यो[illegible]

॥११॥

10

निभृते निर्जने सखि त्वं केशिमथनं कंसं मया सह रमय कीदृशं कामपकीड शालतं महान्तं कथंभूतं तमसा मदनेन मनोरथ इच्छा तस्मिन्भावितया साभिलाष
या कथंभूतं हरिं सविकारं भावसहितं कीदृशया मया निभृतं गूढं यत् निकुंजगृहं वनागारं तत्र गतया प्राप्तया कथंभूतं तं सन्निधिया रात्रौ रहसि एकान्तस्थ
ले निलीय पतिरोभूय वसन्तं तिष्ठन्तं पुनः कथंभूतं मामभिता चकितं सभयं यथा स्यात्तथा विलोकिता सकला दिशो येन पुनः कथंभूतः कृष्णं रतौ रभ
स उत्साहः तस्य भरेण आधिक्येन हसन्तं ईषत्स्मितं कुर्वन्तं अस्मिन् गीते पूर्वार्द्धे राधाविशेषणानि परार्द्धे कृष्णस्येति बोध्यं ॥१॥ प्रथमे प्रथमसमा

निभृतनिकुंजगृहं गतया निशि रहसि निलीय वसन्तं चकितविलोकितसकलदिशा रतिरभसभरेण हसन्तम् ॥१॥ सखि हे के
शिमथनमुदारं रमय मया सह मदनमनोरथभावितया सविकारम् ॥ प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम् ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम् ॥२॥ किसलयशयननिवेशितया चिरमुरसि ममैव शयानम् कृत
परिरंभणचुंबनया परिरभ्य कृताधरपानम् ॥३॥

गमे नवीननवसाविध्येन लज्जितया लज्जायुक्तया कथंभूतं कृष्णं वै लज्जादूरीकरणाय पटूनि कुशलानि यानि चाटुशतानि मधुरशतानि तैरनुकूलं
अनुकूलकारकं मृदु कोमलं मधुरस्मितपूर्वकम् भाषितं यस्याः सा तया शिथिलीकृतं जघनदुकूलं जघनवस्त्रं पटवस्त्रं येन ॥२॥ किसलयैः
किसलयशयने पल्लवरचितशय्यायां निवेशितया उपवेशितया मम एव उरसि चिरं शयानं कृतालिंगनमिति अर्थः कृतं परिरंभणपूर्वकमालिंगनपूर्व
कं चुंबनं यया सा परिरभ्य आलिंग्य कृत [illegible] पानं येन ॥३॥

नि ४

६३

गीतगोविंद०

सतिलकम्

॥१४॥

इति श्रीगीतगोविंदे टीकायां नामपरिचयतिलकं तासां भीषदासकरितयां द्वितीयः सर्गः ॥२॥ इतिराधायाः विरहय्य मुक्त्वा कंसस्य विरहय्य यामाह कंसारिरिति कंसारिरपि कंसो पिराधां हृदये मनसि आधाय संस्थाप्य व्रजसुन्दरी गोपी तत्याज त्यक्तवान् कीदृशीं राधां संसारे पूर्वोक्त भूतार्थोपि स्थापकः संसारो वासना सैव बन्धस्तस्य शृंखलां निगडरूपां ॥१॥ इतस्ततोमपि इतिरिह विधुरता मेवाह इतस्तत इति स माधवः कलिन्दनन्दिनीतटान्तकुंजे यमुनाकूले स्वतागृहे निषसाद स्थितवानित्यर्थः किं कृत्वा इतस्ततो ऽनेकस्थाने तु तां राधां अनुसृत्यान्विष्य कीदृशः अनंगबाणव्रणेन कामबाणाहतेन खिन्नं दीनं मानसं यस्य कृतानुतापः कृतः पश्चात्तापः ॥२॥ कृतानुताप ... मेवाह गीतेन मामियमिति । हरिहरीति खेदानुकारे सा राधा हतादरतया हतेव कुमानतेन कुपितेव कोपप्राप्तेव अन्यस्यानेगतां

इति श्रीगीतगोविन्दे अक्लेशकेशवो नाम द्वितीयः सर्गः ॥२॥ कंसारिरपि संसारवासनाबद्धशृंखलाम् ॥ राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥१॥ इतस्ततस्तामनुसृत्य राधिकामनंगबाणव्रणखिन्नमानसः ॥ कृतानुतापः स कलिन्दनन्दिनीतटान्तकुंजे निषसाद माधवः ॥ गुर्जरीरागे यतिताले प्रति मठताले ॥ मामियं चलिता विलोक्य वृतं वधूनिचयेन ॥ सापराधतया मयापि न वारितातिभयेन ॥१॥ हरिहरि हतादरतया गता सा कुपितेव ॥ किं करिष्यति किं वदिष्यति सा चिरं विरहेण ॥ किं धनेन जनेन किं मम जीवितेन गृहेण ॥२॥ चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण ॥ शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण ॥३॥ तामहं हृदि संगतामनिशं भृशं रमयामि ॥ किं वनेनुस रामि तामिह किं वृथा विलपामि ॥४॥

... संवधूनिचयेन गोपीसमूहेन वृतं वेष्टितं विलोक्य चलिता इतो गता अतिमिल्ले व धा... वचनाम्नापि कृतेनापि सापराधतया कृतापराधत्वेन हेतुना अतिभयेनापि न वारितं नाम किं ... तेन मया अतिभयेन अतिशापितं भयं यस्येति ॥१॥ किं करिष्यतीति सा राधा चिरं विरहेण चिरकालवियोगेन किं करिष्यति किं वदिष्यति तां राधां विना मम जनेन लोकेन किं धनेन च किं जीवितेन च किं गृहेण ... चिन्तयामीति अहं ... राधामुखं चिन्तयामि स्मरामि कीदृशं तदाननं रोष...

हे गोविन्द हे गोविन्दं कृष्णं पश्यामि कीदृशेनानेन हृष्यामि हे गोपीपंक्ति गोविन्दं कामनेवन्दावने व्रजसुन्दरीगणावृतं गोपीसमूहेन वेष्टितं पुनः कीदृशं मां माधुरीद्य
मोहकं हस्तन्यस्तविलासवंशं हस्ते न्यस्तो विन्यस्तो विलासवंशो यस्य सः कीदृशं पुनः कीदृशं अनृजुभ्रूवल्लिमद्बल्लवीनां कुटिलभ्रूलताप्रमत्तानां वल्लवीनां गोपी
नां वृन्देन समूहेन उत्सारी उत्सारितः दृगञ्चलः कटाक्षो येन तं पुनः कीदृशं अतिश्लेषादङ्गारूढस्थलं पश्यति चित्तेन स्मितं तस्मिन् जाता
स्पन्दे सुधाम्नुग्धाननेन मनोहरं मुग्धाननं यस्य॥१॥ अथ नातिदीर्घेण कामो दुर्लभो दर्शयति। दुरालोकेति हे सखि दुरालोकस्तोकस्तवकनवकाशोकलतिका
गणेन कुसुमगुच्छस्तोकाः स्तवकाः पुष्पगुच्छाः यस्मात् तस्मात् शोभा कलतिकायाविकाशः उद्यानः पांथ्य जयति निकुंजेषु नवकाशोपवनपवनो पि सौरभवर निकरः पवनो पि मंद मंदं चलति अपि

हस्तन्यस्तविलासवंशमनघं भ्रूवल्लिमद्बल्लवीवृन्दोत्सारिदृगञ्चलस्थितमतिश्लेषाद्गुरारूढजम्॥ मामुद्दीप्तविलम्बितस्तुधामुग्धाननेना
नेनेगोविन्दं व्रजसुन्दरीगणावृतं पश्यामि हृष्यामि च॥२॥ दुरालोकस्तोकस्तवकनवकाशोकलतिकाविकाशः कासारोपवनपवनोपि स्वयपति श्र
पिच्छापं भृङ्गीरणितरमणीयान मुकुलः प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति॥३॥ साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूव
ल्लीकमलीकदर्शितभुजामूलार्द्धहस्तस्तनं गोपीनां निभृतं निरीक्ष्य दयितां कांचिच्चिरं चिंतयन्नन्तर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः॥

चूतानामाम्राणां मिषमुकुलप्रसूतिः कलिकोद्गमः मांनमुखपतिकर्षं भूता आम्रस्तोनां चञ्चलानां भृंगीनां भ्रमरीणां रणितैः शब्दितैः रमणीयामनोज्ञापीनर्थ्यः शिख
रिणी प्रधानस्य भागवती॥३॥ अथ नायिकोऽकान्तव्याजेन यं भूते साकूतेति नवः शृंगारस्य नुराग केशवो वो युष्माकं क्लेशं दुःखं हरतु कीदृशः केशवः
गोपीनां निभृतं गोप्यभावं निरीक्ष्य दृष्ट्वा कांचिद्दयितां वल्लभां अन्तर्मनसि चिरं चिन्तयन् पुनः कीदृशः मुग्धमनोहरः मोहनकामसुन्दरः कीदृशं निभृतं साकूतं साभिप्रा
यं स्मितं मोषन्तं सं पश्य आकुलाकुलो सत्यार्त्तः गलन्तु स्मृती भवन्तु धम्मिल्लः केशपाशो यत्र उल्लासितौ उच्चैः कृता भ्रूवल्ली का अलीकेनाप्यत्र अलीकेन छलेन दर्शिता
भुजामूलार्द्धहस्तस्तनाय स्मिन् भुजामूलं च अर्द्धहस्तस्तनं यस्मिन्॥४॥

गीतगोविन्द॰
सटिप्पण॰

॥श्री॥ [illegible]

हृदीति अनंग त्वमपि हर भ्रान्त्या महादेव भ्रमेण न प्रहर मा प्रहारं कुरु क्रुधा कोपेन किमु किमिति धावसि मारयितुं धावनं करोषि हर भ्रान्तिं परिहर हे काम मम हृदि हृदये बिसलता हारो [illegible] मृणाललता हारो वर्त्तते नायं भुजंगम नायकः शेषः मम कंठे कुवलयदल श्रेणी नीलोत्पलपंक्तिर्वर्त्तते न सा गरलद्युतिर्हालाहलदीप्तिः इदं मलयज रजो वर्त्तते नेदं भस्म रजः कीदृशे मयि प्रियारहिते राधावियोगिनि ॥ पाणाविति हे क्रीडा निर्जित विश्व लीलाविजितभुवन काम अमुं चूतसायकं आम्रपुष्प बाणं पाणौ हस्ते मा कुरु चापं च धनुः मारोपय सप्रत्यंचं मा कुर्वित्यर्थः यतो मूर्च्छितजनाघातेन मूर्च्छितजनपीडया किं ते पौरुषं पुरुषत्वम् पुरुषार्थः मूर्च्छितत्वे कारणमाह तस्या इति तस्या एव राधाया मृगीदृशो हरिणनयनायाः मनसिजेन कामेन प्रेङ्खन्तो चलन्तो ये कटाक्षा नेत्रान्ताः कटाक्षबाणैः श्रेणीपातैः [illegible] जर्ज्जरितं जर्ज्जरं

॥२३॥

हृदि बिसलताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी कंठे न सा गरलद्युतिः ॥ मलयजरजो नेदं भस्म प्रियारहिते मयि ॥ प्रहर न हर भ्रान्त्यानंग क्रुधा किमु धावसि ॥२॥ पाणौ मा कुरु चूतसायकममुं मा चापमारोपय क्रीडानिर्जितविश्व मूर्च्छितजनाघातेन किं पौरुषम् ॥ तस्या एव मृगीदृशो मनसिजप्रेंखत्कटाक्षाशुगश्रेणीजर्जरितं मनागपि मनो नाद्यापि संधुक्ष्यते ॥३॥ भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां श्यामात्मा कुटिलः करोतु कबरीभारोपि मारोद्यमं मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान् सद्वृत्तः स्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥४॥

12

जर्जरीभूतं मम मनः म[illegible] नागपि स्वल्पमपि नाद्यापि संधुक्ष्यते अंकुरितं भवति ॥ अधुना मनो विषयीकृतां प्रतिस्त्रीयं दुःखमाह भ्रूचाप इति हे तन्वि कृशांगि भ्रूचापे भ्रुव एव चापं धनुस्तत्र निहितोऽर्पितः कटाक्षविशिखः कटाक्षबाणाः मर्मव्यथां मर्मपीडां तावन्निर्मातु करोतु विशिष्टस्य मम व्यथाजनकत्वं उत्पत्स्यत एवेति भावः अन्तुच श्यामात्मा प्रवाभि वर्ण्णः कुटिलो वक्रो भारः कबरीभारोपि केशसमूहोपि मारोद्यमं कामोद्यमं तावत्करोतु मल्लिन स्य कुटिलस्य मारोद्यमोत्पन्नं [illegible] तनोतु बिम्बाधरः रागवान् लोहितवर्णः रागितो विषयिनो

हृदि संगमांतां प्रत्याह। त न्वीति हे तन्वि असूयया असहिष्णुत्वेन खिन्नं दुःखितं तव हृदयं माकलयामि न करोमि ततस्मादहं ते येन्त्विन गतो नेकुतः कुतो न ग
तासि तेन कारणेन त्वं त्वं नानुनयामि न प्रसादयामि त्रिपथा मामुपैनीति संप्रदानं तं ॥५॥ इथपस इति हे राधे त्वं मम पुरतः अग्रेगा तो गतं गम
नागमनमेव विदधासि करोषीति इथपसेन हि पुरेव पूर्ववत् ससंभ्रमं सवेगं परिरंभणमालिंगनं किं कारणेन न ददासि ॥६॥ सम्प्रतामिति हे सुन्द
रि पूर्वकृतापराधः सम्प्रतां अपरमीदृशं तव अपराधं कदापि न करोमि अतएव मम मदर्शनं देहि यतो ऽहं मन्मथेन कामेन दुनो पीडामनुभवा
मि ॥७॥ वर्षितमिति जयदेवकेने दं गीतं वर्षितं कीदृशेन जयदेवकेन हरेः प्रवरोन कुलमस्याचीनेन पुनः कीदृशेन किंडुविल्वं जयदेवकुलं तस्य

तन्वि खिन्नमसूययाहृदयं तवाकलयामि न त्वयेत्यपि कुतो गतासि न तेन तेनुनयामि ॥५॥ इथपसेपुरतो गतागतमेव मे विदधासि
किं पुरेव ससंभ्रमं परिरंभणं न ददासि ॥६॥ सम्प्रतामपरं कदापि तवेदृशं न करोमि देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि ॥७॥
वर्षितं जयदेवकेन हरेरिदं प्रवरोन किंडुविल्वसमुद्रसंभवरोहिणीरमणेन ॥८॥ भ्रूपल्लवं धनुरपांगतरंगितानि वाणाः गुणाः श्रव
णपालिरिति स्मरेण तस्यामनंगजयजंगमदेवतायामस्त्राणि निर्जितजगंति किमर्पितानि ॥

समुद्रस्तस्मात् संभवो यस्येनादृशो रोहिणीरमणश्चन्द्र इव यथा सागरादुत्पन्नश्चन्द्रस्तथा किंदुबिल्वोत्पन्नो जयदेव इति ॥८॥ भ्रूपल्लवमिति इति
पूर्वोक्तप्रकारेण स्मरेण कामेन तस्यां राधायां अस्त्राणि किमर्पितानि स्थापितानि कीदृश्यां तस्यां अनंगस्य कामस्य जये त्रैलोक्यविजये हि जंगमेव
तायां गमनदेवतारूपायां कीदृशान्यस्त्राणि निर्जितजगन्ति जितत्रैलोक्यानि इतीति किं भ्रूपल्लवं भ्रूलताधनुः अपांगतरंगितानि कटाक्ष
निरीक्ष[illegible]णानि वाणाः श्रवणपालिः कर्णप्रदेशः गुणा मौर्वी

२५३

गि

रंगि

रंगि

गीतगोविं०

[illegible]

इदानीं राधासखी कृष्णं प्रत्याह। यमुनेति। राधिकासखी माधवं कृष्णं प्राह। तस्या यामुनतटवर्ती कोऽस्मिन् माधवं यमुनातीरे यो वानीरनिकुंजः वेतसो पलक्षितलतागृहं तत्र मंदं तूष्णीं मास्थितं आसीनं पुनः कीदृशं प्रेमभरेणा राधायां प्रेमातिशयेन उद्भ्रांतमुद्भ्रान्तचित्तं कथमपि प्रसादं स्यानीति उत्कण्ठार्थं गीते नाह अस्य गीतस्य कर्णाटरागः रागलक्षणं तु कृपाणपाणिः गजदन्तपत्रमेकं वहन् दक्षिणकर्णपूरे संस्तूयमानः सुरचारणौघैः कर्णाटरागः शिखिनीलकंठ इति। निन्दतीति अत्र गीते विरहोत्कंठिता वर्णनीया तल्लक्षणं आद्यदाक्ष्ये नापि कान्तयेति वास.... गम्या वोत्कंठा स्वाधीनभर्तृकाऽनया। कलहान्तरिता वाथ विप्रलब्धाभिसारिका॥ खण्डितायोषितो चैव नायिका अष्टौ संमताः। तत्रोत्कंठिता

यमुनातीरवानीरनिकुंजे मन्दमास्थितम्। प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी॥१॥ कर्णाटरागेणा गीयते एकतालीतालेन॥ निन्दति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरं॥ व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्॥१॥ सा विरहे तव दीना माधव मनसिजविशिखभयादिव भावनया त्वयि लीना॥ ध्रुवं॥ अविरलनिपतितमदनशरादिव भवदवनाय विशालं स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम्॥२॥

[illegible] नोक्तं यस्याः सङ्गच्छति प्रान्ते प्रवासीनेति यत्नभः साक्षात् न वसंतमपि विरहोत्कंठितामतेति। गीतार्थस्तु हे माधवकृष्ण ध्यानतः विरहे सति दीना कृशा तव विरहे प्रवेशे भावनया अनुचिंतनेन कामवाणाः कृष्णविरहे प्रविष्टास्त्वयि मा न पीडयिष्यतीति भावनालीना भवि... मनसि जविशिखभयादिव कामबाणभयादिव केन प्रकारेण तिष्ठतीत्याह हे कृष्ण सा राधा चन्दनं निन्दति इन्दुकिरणं चन्द्रदीप्तिमनुलक्षीकृत्य अधीरं महान्तं खेदमनुवि[न्दति] पंचिन्दति अनुचरमलयसमीरं मलयजपवनं [illegible] मन्यते॥१॥ अविरलेति हे कृष्ण

tānīti | tāni varasparśasukhāni yāni nidhuvanādhikāsaṅkāśe 'nubhūtāni te ca taralāś cañcalāḥ snigdhāḥ premānvitā dṛśor vibhramā vilāsāḥ etena nū- pena (?) tad vaktrāmbujasaurabhaṃ vadanakamalasurabhitvaṃ etena gandhatvaṃ sa ca sudhāsyandī amṛtadravayuktaḥ girāṃ vacasāṃ vakrimā vakratvaṃ etena śabdaḥ sā ca bimbādharamā- dhurīti snigdhatayā rūpo mādhuryaṃ tad eva etena rasaḥ iti viṣayāsaṅge 'pi tasyā rūparasasparśādīnāṃ pañcānāṃ prāptāv api mama mānasaṃ manaḥ tasyāṃ rādhāyāṃ lagnasa- mādhiprāptaṃ dhyānaṃ vartanena yadyapi hanta khede virahavyādhiḥ kathaṃ vardhate dhyānayuktasya yogino vyādhinā (?) ...te || athedānīṃ kavir bhaktān pratyāśiṣaṃ

tāni sparśasukhāni te ca taralāḥ snigdhā dṛśor vibhramās tad vaktrāmbujasaurabhaṃ sa ca sudhāsyandī girāṃ vakrimā || sā bimbādharamādhurīti viṣayāsaṅge 'pi cen mānasaṃ tasyāṃ lagnasamādhi hanta virahavyādhiḥ kathaṃ vardhate || 7 || tiryakkaṇṭhavilolamaulitaralottaṃsasya vaṃśoccarad- gītisthānakṛtāvadhānalalanālakṣair na saṃlakṣitāḥ || sammugdhe madhusūdanasya madhure rādhāmukhendau mṛdusyandaṃ kandalitāś ciraṃ dadhatu vaḥ kṣemaṃ kaṭākṣormayaḥ || 8 || iti śrīgītagovinde mugdhamadhusūdano nāma tṛtīyaḥ ... || sargaḥ || 3 ||

... || tiryag iti | madhusūdanasya kṛṣṇasya kaṭākṣormayaḥ kaṭākṣataraṅgāḥ vo yuṣmākaṃ bhaktānāṃ kṣemaṃ ciraṃ dadhatu prapañcayantu kīdṛśāḥ madhure sundare rā- dhāmukhacandre sammugdhe āsakte mṛdusyandaṃ kiñcic calanaṃ yathā syāt tathā kandalitāḥ pallavitāḥ punaḥ kīdṛśāḥ vaṃśād veṇor uccarad gītisthāne gītasthā- nasthāne ... kṛtāvadhānair dattamanobhir lalanānāṃ strīṇāṃ lakṣair na saṃlakṣitā jñātā na dṛṣṭāḥ tat syāt kīdṛśasya madhusūdanasya tiryak kaṇṭhe vilolaḥ ... maulau taralaś cañcala uttaṃso yasya ... paścāt karmadhārayaḥ ... prathamaṃ sarge (?) tataḥ kaṇṭhe hariḥ ... vihāratīty arthaḥ || 8 || iti śrīgītagovindaṭīkāyāṃ tṛtīyaḥ sargaḥ || 3 ||

गीतगोविन्द०
सटिप्पणम्

प्रतिपदमिति हे सखि सखाराधाप्रतिपदं प्रतिक्षणमिदमपि निगदति वदति हे माधव कृष्ण तवचरणोऽहं पतिता किमिन्यत आह त्वयि विमुखे पराङ्मुखे सति मयि सुधानिधिरपि चन्द्रोऽपि तनुदाहं शरीरदाहं तनुते विस्तारयति यत एव न्द्रोऽपि अङ्कुरते अतएव चरणोपतिता ॥६॥ ध्याने ति हे कृष्ण ध्यानेलयेन पुरः कल्पितं भवन्तं ध्याने नलयेन चिन्ते काम्यवलेपे राज्ञरोऽम्बपरिकल्प्य कल्पनां कृत्वा मपि त्वां हि मिदानीं मपि न करोति इति विलापं करोति हसति मधुरध्यानेन निविशीरति ह स्थानन्तरमानपन्मान् वंचति स्थानानन्तरं गच्छति स्थानानते आलिंगनादिकं करिष्यतीति अतएव तापं मुंचति मनस्तापं त्यजति ॥७॥ श्रीजयदेवेति श्रीजयदेवेन भणितं कथितं निर्दिं गीतं मनसा

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताऽहम्। त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ॥६॥
ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम्। विलपति हसति विषीदति रोदिति चंचति मुंचति तापम् ॥७॥ श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम् ॥ हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम् ॥८॥ आवासो विपिनायते प्रियसखीमालापि जालायते ॥ तापोऽपि श्वसितेन दावदहनज्वालाकलापायते सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम् ॥९॥

तेनाधिकं शातितापं पदि नटनीयं नतापितमनसा हरिविरहेन कृष्णवियोगेन व्याकुला या वल्लवयुवत्यो गोप्यः सखीवचनगीतं जयदेवगीतेषु इति पठनीयम् नाहं लोके नाहम् ॥८॥ आवास इति हे कृष्ण हन्त इति खेदे साराधापि त्वद्विरहे त्वामर्थवियोगेन हरिणीरूपायते मृगीरूपि णी वर्तते कथमित्यत आह आवासोऽपि विपिनायते वनमिवाचरति प्रियसखी मालापि जालायते गजमानिवारतन्तु जालायते

कुसुमेति कुसुमशय्यां करोति अनल्पविलासकलाभिः बहुतरक्रीडाभिः कमनीयं सुन्दरं पुष्पशय्यास्वयमेव मनोज्ञाद्धं तु शिरवनाकुशल्या शय्या भावेपुष्पशय्यामेव
करोतीत्यर्थः किमिव कुसुमविशिखः काम तस्य शराः पुष्पाणि तान्येव तल्पं शय्या तामाह प्रां व्रतमिव शरशय्या शायन रूपं शतुखां व्रतमिति भावः किमर्थं व्रतमि
त्यतआह नवपरिरंभसुखाय आलिंगनसुखं प्राप्तुमित्यर्थः ॥३॥ वहतीति सा राधा अच्छां मनोज्ञमाननकमलं वहति धारः पंकिकीदृशं चलितमुच्छीसितं य
द्विलोचनजलं नेत्राश्रु तत् धारयतीति किमिव विधुमिव कीदृशं विधुं विकटेन दारुणेन महता विधुंतुदस्य राहोर्दन्तेन दलनं तस्माद् गलितामृतधारा

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम् । व्रतमिव तव परिरंभसुखाय करोति कुसुमशयनीयम् ॥३॥ वहति
च वलितविलोचनजलधरमाननकमलमुदारं । विधुमिव विकटविधुंतुददन्तदलनगलितामृतधारम् ॥४॥ विलिख
ति रहसि कुरंगमदेन भवन्तमसमशरभूतम् । प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ॥५॥

यस्मात् ॥४॥ विलिखतीति हे कृष्ण सा राधा असमशरभूतं कन्दर्पस्वरूपं भवन्तं त्वां रहसि एकान्ते कुरंगमदेन मृगमदेन कस्तूरिकया विलिखति
अधः कामरूपस्य भवतः । यस्मात् मकरं कामवाहनं विनिधाय कराहस्ते नवचूतं नूतनाम्ररूपं शरं बाणं च विनिधाय तस्याग्रे प्रणमति पूजानं
तरं प्रणाम पूजयत एवं मकरस्य ध्वजत्वे प्रसिद्धेपि वाहनत्वेन दोषः ॥५॥

[illegible]

सतिसकामं हरिरिति सानि काममतिशयेन सकाममभिलाषं हरिरिति हरिरिति जपति अथ च भूतेन विरहविहितमरणेन वियोगेन विहितं कृतं मरणं यस्याः सा अन्योपि म रणे हरिरिति मन्त्रं जपति ॥७॥ श्रीजयदेवेति श्रीजयदेवेन भणितं इति पूर्वोक्तं गीतं केशवस्य पदं विश्रान्तिस्थानं यस्य तं भक्तं सुखयतु निकटे यन्तं उपनीतं उपनीतं उपढौकितः अधुना सा तव विरहेनाथ रूपं बिभर्ति इति श्लोकेनाह ॥८॥ हे स्वर्वैद्यप्रतिम अश्विनीकुमारतुल्य यदि त्वं प्रसीदसि प्र सन्नो भवसि तव रतनुः सुकुमाराङ्गी सा राधा एतावति अतनुः वरे कामज्वरे सति न च सा न किं न जीवेत् अपि तु जीवेदेव रसः शृङ्गारः पक्षे अधर्षं अन्यथा प्रसन्नाभावे अन्ते फः हलालेथ तत्प नतः ज्वरे सन्निपाते यथा न पयो भवति तेन तस्या वलन्ततुल्याह सा राधा रोमाञ्चति रोमाञ्चं चेति

रवि इति हरिरिति जपति सकामं विरहविहितमरणेव निकामं ॥ श्रीजयदेवभणितमिति गीतं सुखयतु केशवपदमुपनीतम् ॥ सा रोमाञ्चति सीत्करोति विलपति उत्कम्पते ताम्यति ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि । एतावत्यतनुज्वरे व रतनुर्जीवेन्न किं ते रसात् स्वर्वैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः ॥१॥ स्मरातुरां दैवतवैद्यहृद्य त्वदङ्गसङ्गामृ तमात्रसाध्याम् । विमुक्तबाधां कुरुषे न राधामुपेन्द्र वज्रादपि दारुणोऽसि ॥२॥

प्राप्नोति सरोमाञ्चा भवतीत्यर्थः सीत्करोति सीत्कारं करोति विलपति विलापं करोति उत्कम्पते सकम्पा भवति ताम्यति ग्लानियुक्ता भवति ध्यायति चिं तयति उद्भ्रमति उद्वेगं नीता भवति प्रमीलति नेत्रनिमीलनं करोति पतति भूम्यां पतति उद्याति उद्वेगं गच्छति मूर्छति मूर्च्छां प्राप्नोति ज्वरि रूपस्य एताव भवति ॥ स्मरातुरामिति हे दैवतवैद्य अश्विनीकुमारवत् रूपसुन्दर हे उपेन्द्र अनुज त्वं राधां विमुक्तबाधां त्यक्तपीडां न

इदानीं सखी पुनरपि राधायाः दुःखचेष्टितं गीतेनाह स्तनेति देशाख्यरागः रागस्तत्रत्यो श्रोतव्यो ऽनोविकृततरो महर्षीनियुक्तं मधुरं चिपास्तवाद्धः प्रांशुः श्यामद्युति रिन्दुगौरद्युतिः वा देशाख्यरागः किल मनसामूर्त्तिः ॥१॥ हे केशव हे कृष्ण तव विरहे पानेक्षति राधिका यं चेष्टते की दृशमिमं तत श्राह कृशतनुर्विरहकृशशरीरा सा राधा स्तन विनिहितमपि स्तनयोः स्थापितमुदारं बहुमूल्यं हारमपि मुक्ताहारमपि भारमिव मनुते ॥१॥ सरसमिति सा राधा सरसमसृणं स्निग्धं चिक्कनं मलयजपंकम पि चन्दनलेपमपि वपुषि सशंकं विषमिव पश्यति तव विरहात् ॥२॥ श्वसितेति सा राधा श्वसितपवनं निःश्वासवायुं मदनदहनमिव कामाग्निमिव वहति धार यति धायोरपि दाहकत्वात् कीदृशं अनुपमम् उपमारहितः परिणाहो विशालता यस्य सदाहम् सन्तापसहितम् ॥३॥ दिशीति सा राधा सजलकणजालं अश्रु बिं

स्तनविनिहितमपि हारमुदारम् सा मनुते कृशतनुरिव भारम् ॥१॥ राधिका विरहे तव केशव ध्रुवपदम् । सरसमसृणमपि मलयजपंकं पश्यति विषमिव वपुषि सशंकम् ॥२॥ श्वसितपवनमनुपमपरिणाहम् ॥ मदनदहनमिव वहति सदाहम् ॥३॥ दिशि दिशि किरति सजलकण जालम् ॥ नयननलिनमिव विगलितनालम् ॥४॥ नयनविषयमपि किसलयतल्पं गणयति विहितहुताशविकल्पम् ॥ त्यजति न पा णितलेन कपोलम् बालशशिनमिव सायमलोलम् ॥५॥

न्दुसमूहं सहितं नयननलिनं नेत्रपद्मं दिशि दिशि प्रतिदिशं वदनं जलबिन्दून् किरति क्षिपति कीदृशमिव विगलितनालमिव गलितदण्डमिव ॥४॥ नयनेति सा राधा नयनविषयमपि नेत्रगोचरमपि किसलयतल्पं पल्लवशय्यां गणयति विहितहुताशविकल्पं विहितः कृतः हुताशविकल्पो ऽग्निसंकल्पो यत्र तादृशं मन्यते ॥४॥ त्यजतीति सा पाणितलेन हस्ततलेन कपोलं गण्डस्थलं न त्यजति क्षिपति न तदा स्तत्र किमिव सायं संध्याकाले अलोलं निश्चलं बालशशिनमिव द्वि तीयचन्द्रमिति हस्ते नाच्छादितत्वात् कपोलस्य पाण्डुतया चन्द्रसाम्यं हस्तस्य लोहितत्वात् संध्यासाम्यम् ॥५॥

गी॰गोविन्द॰
सतिलकम्॰

॥१६॥ [illegible]

इदानीं कृष्णप्रेरिता सखी राधामाह। अतिमधुरिपुणा कृष्णेन नियुक्ता प्रेरिता सखी स्वयमेत्यागत्य इदं वक्ष्यमाणं राधां पुनर्जगाद। किं चोक्तमित्याह। हे सखि अहमिह निकुञ्जे निवसामि स्थितोऽस्मि त्वं राधां याहि अनुनयप्रकारैस्त्वं मद्वचनेन सान्त्वेन च तस्या राधाया मानमपनीय आनयेथाः मानयस्वेति ॥१॥ वराडीरागः रागलक्षणम्। विनोदयन्ती दयितं मुकेशी सुकंकणा चामरधारिणी च रम्येरधाना सुरपुष्पगुच्छं वराडिरागेयं कथिता वरारीति ॥२॥ अत्राभिसारिकानायिका वर्णनीया तदुक्तं रसिकसर्वस्वे सं[केतन]ा प्राकृतं मिछं न्तीः भृंगाभाषरां ततः प्रियतरावे प्रयासर्वतथ्या अभिसारिकेति तत्रैव तल्लक्षणं लज्जां हित्वा समाकर्ण्य यौवने नमदेन वा अभिसारयेत् कान्तं कीर्तिता साभिसारिकेति वहतीति हे सखि राधे तव विरहे वियोगे वनमाली कृष्णः सीदति दुःखितो भवति कस्मिन् सति मदनं काममुपनिधाय

अहमिह निवसामि याहि राधामनुनय मद्वचनेन चानयेथाः। इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधाम्॥ देशवराडीरागे रागेयपते रूपकताले॥ वहति मलयसमीरे मदनमुपनिधाय। स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ॥१॥ तव विरहे वनमाली सखि सीदति ध्रुवपदम्॥ दहति शिशिरमयूखे मरणमनुकरोति। पतति मदनविशिखे विलपति विकलतरोऽति ॥२॥ ध्वनति मधुपसमूहे श्रवणमपिदधाति मनसि चलितविरहे निशि निशि रुजमुपयाति ॥३॥

वहायं कृता मलयसमीरे दक्षिणपवने वहति सति पुनः कस्मिन् सति विर[illegible]हियां वियोगिनां हृदयदलनाय हृदयस्फोटनाय कुसुमनिकरे पुष्पसमूहे स्फुटति विकसति सति ॥१॥ दहतीति हे राधे सः श्रीकृष्णः शिशिरमयूखे चन्द्रमसि दहति सति मरणमनुकरोति मरणानुकारं करोति मदनविशिखे कामबाणे पतति सति विलपति अति धाम्नेन विलापं करोति कीदृशः कृष्णः विकलतरो विविह्वलतरः ॥२॥ ध्वनतीति मधुपसमूहे भ्रमरसमूहे

16

कन्दर्पेति हे कृष्ण अस्याः राधायाश्चेतो मनश्चिरं चिरकालं चन्दनस्य चन्द्रमसश्च कमलिन्याश्च चिन्तासु स्मरणेष्वपि ताम्यति ग्लानिमेति इदं महदाश्चर्यं किंभूतायाः अस्याः कन्दर्पज्वरेण कामसन्तापेन पश्चात् ज्वरेः पीडिता नाकुला चंचला तनुः शरीरं यस्यास्तस्याः किंतु रहसि एकान्ते स्थितासौ राधा त्वमेवैकं प्रियं ध्यायन्ती क्षणं मुहूर्तं क्षान्तिरसेन शान्तिर्विधानेन शीतलतरेण कान्तिविधानेनेति पाठः तस्मिन् गते नायान्तं रागान्तरे आगमिष्यतीति अनु रागेण कथंचित् प्राणिति जीवतीति कथमिति प्रश्ने कीदृशी क्षीणा तीक्ष्णा गतरागा ॥३॥ तेनापि विरहे कृष्णमपाराधयन्ति विरहवियोगः पुरा पूर्वं न सेहे सोढा कीदृश्या राधया नयनयोर्नेत्रयोर्निमीलनेनापि आच्छादनेनापि निमेषेण खिन्नया दुःखितया असौ राधा नवचिरविरहे नवचिरं वियो

कन्दर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं चेतश्चन्दनचन्द्रमःकमलिनीचिन्तासु सन्ताम्यति किंतु क्षान्तिरसेन शीतलतरं त्वामेवमेकं प्रियं ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति ॥३॥ क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नया यया ते श्वसिति कथमसौ रसालशाखां चिरविरहेऽपि विलोक्य पुष्पिताग्राम् ॥४॥ वृष्टिव्याकुलगोकुलावनवशादुद्धृत्य गोवर्द्धनं बिभ्रद्बल्लववल्लभाभिरधिकानन्दाच्चिरं चुम्बितः कन्दर्पेण तदर्पिताधरतटीसिन्दूरमुद्राङ्कितो बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः ॥५॥ इति श्रीगीतगोविन्दे चतुर्थः सर्गः ॥४॥

गं न कथं श्वसिति न त्यजति किंभूतां पुष्पिताग्रां रसालशाखां आम्रशाखां विलोक्य ॥४॥ इदानीं कवेरुपक्रमे स्वस्य कवियत्नान् प्रत्याशिषं ब्रूते ॥ वृष्टीति गो पतनोर्गोपशरीरस्य कंसद्विषः श्रीकृष्णस्य बाहुर्भवतां तव मङ्गलं श्रेयांसि तनोतु विस्तारयतु कीदृशो बाहुः वृष्ट्या जलवर्षेण व्याकु कुलस्य दुःखितस्य गोकुलस्य गोपसमूहस्यावनवशाद्रक्षणानुरागात् गोवर्द्धनं पर्वतमुद्धृत्य उत्पाट्य बिभ्रत् धारयन् कीदृशो बाहुः वल्ल

॥३॥ [illegible]

पतति निरहराधे पतत्रे पतति सति तिमिरः । शयनं शय्यां रचयति निर्मातितरां पन्थानं मार्गं सचकितनयनं यथा स्यात्तथा पश्यति कीदृशं पतत्रि पक्षि शिखागच्छति सति पत्रे पुष्पे विचलति सकंपमाने सति संकितं सं भावितं भवत्या उपमानं समीपागमनं यस्मिन् राधा प्राप्य समागच्छति पतत्त्रं पक्षिणां पत्रः तद्धि यत्र पस्येति अर्थो आदित्वात् अच् ॥३॥ मुखरमिति हे सखि राधे मुखरं शब्दयुक्तं मंजीरं नूपुरं त्यज कीदृशं मंजीरं अधीरं शब्दाधिकरणत्वात् गमनसूचकमित्यर्थः केलौ कीदृशं सुलोलम् अतिचंचलं अतस्त्वं रिपुमिव शत्रुसमं प्रिय संनिसुरवरो धीरप्रवंचक भवति मंजीरं त्यक्त्वा सतिमिरपुंजं अंधकारसमूहयुक्तं कुंजं लतागृहं चल गच्छ नीलनिचोलं श्यामवस्त्रं शीलय परिधेहि अभिसारे अदृश्यार्थं नीलवस्त्रपरिधानं क्रियते ॥४॥ उरसीति हे पीने गौराङ्गि हे सुकृतविपाके पूर्व

पतति पतत्रे विचलति पत्रे संकितभवदुपयानम् । रचयति शयनं सचकितनयनं पश्यति तव पन्थानम् ॥३॥ मुखरमधीरं त्यज मंजीरं रिपुमिव केलिसुलोलम् । चल सखि कुंजं सतिमिरपुंजं शीलय नीलनिचोलम् ॥४॥ उरसि मुरारेरुपहितहारे घन इव तरलबलाके । तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ॥५॥ विगलितवसनं परिहृतरसनं घटय जघनमपिधानम् । किसलयशयने पंकजनयने निधिमिव हर्षनिधानम् ॥६॥

जन्मार्जितस्य सुकृतस्य विपाकः परिणामः प्राप्तं तत्संबोधनं अन्यथा कस्य विपरीतसुरतं कथं प्राप्यते मुरारेः श्रीकृष्णस्य उरसि वक्षसि रतिविपरीते [illegible] उपहितहारे आरोपितहारे राजसि शोभिष्यसे वर्तमानसामीप्ये भूतवद्वा कथंभूते उरसि उपहितः आरोपितः हारो मुक्ता [illegible] यस्मिन् अथवा संबोधने उपहितो हारो यस्याः सा अथ राधाया हारो ननु [illegible] कृष्णस्य हारः कौस्तुभः तत्र विक्षोभः भवेत् पुनः कथंभूते उरसि घन इव मेघ इव तरल चंचल बलाकासमूहे [illegible] हारस्य बलाका साम्यं उरसो मेघसाम्यं राधायास्तडित्साम्यम् ॥५॥ विगलितेति हे राधे किसलयशयने पंकजनयने निधिमिव [illegible] जघनं विगलितवसनं त्यक्तवस्त्रं

॥१८॥

17

यस्तीति स विपिनवितानं अरण्यविस्तारं वसति तिष्ठति अपां सखि त्वं धाम सुन्दरं गृहं त्यजति घरशोभापने लुठति विचेष्टते तव नाम बहु अनेकवारं विज पति ॥१॥ भरातीति कविनयदेवे विरहिणां वियोगिनां विलसितेन विलासेन भरातित्सन्ति वियोगिचेष्टितं कथयति सती यर्थः । हरिः कृष्णः मनसिजं यदेव मनसिज कृतेन पूर्वोपार्जितेन पुरोपन्नहेतुना उत्पन्नं उदयं प्राप्नोतु कस्य शमनसि स्मरस्य हर्षवर्धावभवं आधिकं यस्मिन् ॥५॥ किंचत्येन प्राप्तार्थेन पः करोति चित्र है। पूर्वमिति सहे राधे माधवः श्रीकृष्णः तस्मिन्नेव निकुंजमन्मथमहातीर्थे निकुंजमेथ लताग्रहमेव मन्मथमहातीर्थं नामतीर्थं तत्र पुरस्त्वाम निशं ध्यायन् वैधा जाप मंत्रावलीं संभाषरामेव मंत्रावली मंत्राक्षरसमूहं जपन्नेव भूयः पुनरपि त्वं कुचकुंभनिर्भरपीवरंभामृतं त्वदीयस्तनकलशौ त्वालिंगनपी यूष

वसतिविपिनवितानेत्यजतिललितमपि धाम ॥ लुठति धरणिशयने बहु विलपति तव नाम ॥८॥ भरातिकविजयदेवे विरहिविलसितेन ॥ मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥५॥ पूर्वं यत्र समं त्वया रतिपते रासादिताः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्माधवः ध्यायं स्त्वामनिशं जपन्नपि तवैवालापमंत्रावलीं भूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतं वांछति ॥१॥ गुर्जरीरागेणगीयते एकतालीताले रतिसुखसारे गतमभिसारे मदनमनोहरवेशं ॥ न कुरु नितंबिनि गमनविलंबनमनुसरतं हृदयेशम् ॥ धीरसमीरेयमुनातीरे वसति वने वनमाली ॥१॥ गोपीपीनपयोधरमर्दनचंचलकरयुगशाली ॥ ध्रुवपदम् ॥ नामसमेतं कृतसंकेतं वादयते मृदुवेणुम् ॥ बहु मनुते ननु ते तनुसंगतपवनचलितमपि रेणुम् ॥२॥

मिवामृतमिव वांछति तस्मिन् कस्मिन् यत्र महातीर्थे त्वया समं पूर्वं रतिपतेः कामस्य सिद्धयो मनोरथा आसादिताः प्राप्ताः यस्य नां सिद्धिं प्राप्य पतन्नारं भो साम्प्रतं प्राप्यते लहन ॥१॥ इदानीं सखी राधां संप्रति गंतुं प्रेरयति ... यत्र वसति तिष्ठति कोदेशा नीरे धीरसमीरे

यायुग्मे रतिं वेणुमपि बहु साधु पः स्यात् त्वया मनुते ॥२॥

लब्धावधेनेति हे मुग्धे मूढे लब्धावधेन अवधिसामानसहितेन समग्रं सामस्त्येनाधुनेदानीं तिग्मांशुः सूर्योऽस्तं गतः अस्तं नामसहितः सूर्योऽस्तंगतः अ
भिसार ममेति यावत्पर्थः गोविन्दस्य कृष्णस्य मनोरथेन इदानीं राधा आगमिष्यतीति वांछयासमं सह तमः अंधकारः सान्द्रतां निबिडत्वं प्राप्तं तमस्याभि
सरतो यो ग्यमित्यर्थः दीर्घा मदभ्यर्थना मम प्रार्थना इति मदीया प्रार्थना कोकानां चक्रवाकानां करुणस्वनेन दीर्घ हृदयानाम्यर्थेन सदृशी यथा
कोकानां करुणस्वने नानाप्रकाराः स्वन्तेन थापि मदीया कारुण्यप्रः संप्रतिवाच्ये भवन्तीत्यर्थः तत्तस्मात् हे मुग्धे विलंबनं विफलं असो अभिसार
क्षणो अभिसरतां कान्तार म्यो गमनयोग्यमित्यर्थः ॥२॥ अभिसारे रसाधिक्यं भवतीत्याह आश्लेषादिति दंपत्योर्जायापत्योस्तमसि अन्धकारे

लब्धावधेन समं समग्रमधुना तिग्मांशुरस्तं गतो गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रतां। कोकानां करुणस्वनेन सदृ

शी दीर्घा मदभ्यर्थना तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः ॥२॥ आश्लेषादनु चुम्बनादनु नखोल्लेखादनु
स्वान्तजप्रोद्बोधादनु संभ्रमादनु रतारम्भादनु प्रीतयोः ॥ अन्यार्थं गतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतोर्दम्पत्योरिह

को न को न तमसि व्रीडाविमिश्रो रसः ॥३॥

कः व्रीडाविमिश्रो लज्जायुक्तो रसो न भवेत् अपि तु सव्रीडः सर्व एव शृंगारादिरसो भवत्येव कथंभूतयोर्दंपत्योरन्यार्थं परस्त्रीप्रस्थायै गतयोः संकेतस्था
नं प्राप्तयोः पुनः कथंभूतयोः भ्रमात् भ्रान्त्या गाढांधकारे रसान्मिलितयोः संगतयोः अनन्तरं च आश्लेषादिनि विशेषणानि योजनीयानि तत्रैवं
संभोगक्रमः प्रथममालिंगनं ततश्चुंबनं ततो नखक्षतानन्तरं स्वान्तजप्रोद्बोधात्तु कामस्योद्भवात् पश्चात्संभ्रमादनुवेगात्पश्चात् रतारंभादनु
रतो हे गात्पश्चात्प्रीतयोर्हृष्टयोः पुनः नाः

हरिरभिमानी रजनिरिदानीमियमपि याति विरामम् इत्यर्थः इदानीं मधुनाशनं अनेकधा हरिरपि विरामम् प्रसाधनं यातीति वर्तमाने लट् मम वचनं कुरु शीघ्रमागच्छेत्यर्थः कीदृशं मम वचनं सत्वरा शीघ्रा रचना यस्मिन् गत्वा च मधुरिपुकामं पूरय अभिलाषं पूरय ॥७॥ श्रीजयदेवेति कृतहरिसेवेन कृता हरिसेवा येन तस्मिन् जयदेवे परमरमणीयं भणितिं अतिशयेन मनोहरं हृदयं तं भजत हरिं नमत सुकृतकमनीयं पुण्यैः कमनीयं कान्तं अतिसदयं दयायुक्तं हरिं नमत सुकृतिनः भक्तान् प्रति उक्तिः कीदृशं प्रमुदितहृदयं प्रसन्नहृदयं पापनाशे च शीघ्रं प्रसीदतीति नमनं कर्त्तव्यमिति भावः पुनः कीदृशं सुकृतकमनीयं पुण्यैः ॥

हरिरभिमानी रजनिरिदानीमियमपि याति विरामम् ॥ कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ॥७॥ श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् ॥ प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ॥८॥ विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते प्रविशति मुहुः कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते ॥

नवाङ्गनीयम् । मधुनाशी श्रीकृष्णं प्रेरयति विकिरतीति हे कान्ते तव प्रियः कृष्णः मदनकदनक्लान्तः कामपीडोपतप्तो वर्त्तते निवसति ॥१॥ केन प्रकारेण तत्त्वमाह इदानीमपि नागतेति श्वासान्मुहुर्वारंवारं विकिरति विक्षिपति एकाग्रचित्ततया नाम्नैव ध्यानं नासापुरो नासाग्रं मुहुरीक्षते पश्यति ध्याने अदृष्ट्वा मुहुः कुञ्जं गुञ्जन् अहं प्रविशामि अत्र भविष्यतीति तत्रापि अदृष्ट्वा मुहुः गुञ्जन् रोदने कार्योत्पादिजल्पन् बहु ताम्यति ग्लायति बोधमागतां दृष्ट्वैव मुहुः शय्यां मार्जनीं रचयति शय्यां श्वासनापि नागतेति मुहुः पर्याकुलमीक्षते दिशः पश्यति दूरादागतामेव दृष्ट्वा पुनः स्वागतं ते (इति)

गीतगोविंद०
सटीकम् ०

॥७॥ [illegible]

गुणकरीरागः रूपकतालः राग्यत्तराम् नाथो हुंकाको नुपष्टं यतीता मार्गा लप नीश्च दुष्यत स्ये दनमनः प्रविज चन्द्रि राधा सा मानतुर्गो रा करी ॥ दृष्टिश्च ति असिम्न नासकुराध्या वर्पणे वार्म वेषम सुफाल्वि न्येषास मागानि विद्ये विरधा ना प्रिय समाग मस्म्या ताभिः लकल पवासकसमाया मिति पश्यति ति हेना थ हरे आद्मोति राधानबयाग रहे वाच्या ने नतत्वत्तः देतोः सीदति अवस्था भवति कृष्णमित्यत आह यथा रहसि एकान्ते दिशि दिशि भवन्तं पश्यति वसो कुपति कीदृशं भवन्तं तदधरमधुराणि मधूनि पिबन्तं ॥१॥ त्वदभि सारारभसेन वलन्ती पतति पदानि कियन्ति चलन्ती तव नपा पयतोत्स्वः कीदृशा त्वदभि सरकोत्ना ई नवल नीसज्ज मानाः ॥२॥ विहिते ति हे कृष्ण सा राधा तव रतिकलया न पवना ने ऋवचिंतनेन इह भमसपरंके पर्यंकेजी

गुणकरीरागः रूपकतालः पश्यति दिशि दिशि रहसि भवंतम् ॥१॥ नाथ हरे सीदति राधा वासगृहे ॥ ध्रुवपदम् ॥ त्वदभिसरणरभसेन वलंती पतति पदानि कियन्ति चलन्ती ॥२॥ विहितविशदबिसकिसलयवलया ॥ जीवति परमिह तव रतिकलया ॥३॥ मुहुरवलोकितमंडनलीला ॥ मधुरिपुरहमिति भावनशीला ॥४॥ त्वरितमुपैति न कथमभिसारम् ॥ हरिरिति वदति सखीमनुवारम् ॥५॥ श्लिष्यति चुम्बति जलधरकल्पम् ॥ हरिरुपगत इति तिमिरमनल्पम् ॥६॥ भवति विलंबिनि विगलितलज्जा ॥ विलपति रोदिति वासकसज्जा ॥७॥

वति जीवनहेतुरन्यो नास्तीत्यर्थः कीदृशी विहिताः कृता विशदाः शुभ्रा बिसाः किसलयसंबन्धिनी अंकुरा एव वलयानि कंकणानि यस्याः सा ॥३॥ मुहुरिति सा कीदृशी पूर्वं मंडनं त्वया मुहुः पुनः पुनरवलोकिता विहिता प्रागनेन लीला अलंकारविलासो यया तेन विना निरर्थकं मंडनमिति पुनः कीदृशी अहं मधुरिपुरिति भावनशीला भावनं ध्यानं तेन हरिरेवाहं भाव तद्वद्भावः तत्स्वभावः यस्याः सा ॥४॥ त्वरितमिति । राधा सखीमिति अनुवारं पुनः पुनर्वदति कीदृशीति किम् हरिः कृष्णः त्वरितं शीघ्रं अभिसारं मम मिलनार्थं अस्थानं कथं नोपैति नागच्छति ॥५॥ श्लिष्यतीति सा राधा हरिः कृष्ण उपगतः प्राप्त इति अनल्पं बहु तिमिरं अंधकारं श्लिष्यति चुम्बति च कीदृशं तिमिरं जलधरकल्पं मेघसदृशं स्निग्धत्वान्नीलत्वाच्च कृष्णसादृश्यमिति [illegible] विलंबिनि त्वयि विगलितलज्जा सती विलपति रोदिति

॥२०॥

19

तेस्याभातेस्सः कृतार्थो भवती त्याह। कथंभूते तिरे सुमुखि सुवदने राधे सुभगः सोभाग्यवान् सः कृष्णस्त्वां पश्यन् कृतार्थतां सफलत्वम् उपैतु प्राप्नोतु कीदृशीं त्वां तिमिरे अंधकारे रसहिते पथि मार्गे भयचकितं विस्मयसहितं यथास्यात्तथा दृशं नेत्रं विनयन्तीति यतीं निविडं घनात् एवं नाभ्दूतं अंधकारे निःशंका गमनाद्विस्मयः पुनः कीदृशीं प्रतितरु वृक्षे वृक्षे मुहुः पुनः पुनः स्थित्वा मंदं शनैः पदानि चरणन्यासान् वितन्वतीं वं स्तेकृत्वे कृष्णसमीपं गन्त्यास्त्वेच नापान भयादिति भावः पुनः कीदृशीं कथमपि महता कष्टेन रहस्यं निविडं एकान्तं प्रापिता फेनापि प्रकारेण रहः एकान्तस्थलं प्राप्तां पुनः कीदृशीं अनंगतरंगिभिः कामस्य तरंगाः पुनः पुनर्वैः धमता पुलके रंगैर्दे हावयवैः उपलक्षितां॥१२॥ इदानीं कविर्भक्तं प्रत्याशिषं ब्रूते राधेति देवकीनन्दनः श्रीकृष्णस्त्वां भक्तं चिरमवतु रक्षितात् कीदृशः कृष्णः राधामुग्ध

भयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम्। कथमपि रहः प्राप्तामंगैरनंगतरंगिभिः सुमुखि सुभगः पश्यन् स त्वामुपैतु कृतार्थताम्॥१३॥ राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली नेपथ्योचितनील रत्नमवनीभारावतारान्तकः। स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः॥१४॥

इति श्रीगीतगोविन्दे पंचमः सर्गः॥५॥ अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह॥१॥

मुग्धं यन्मुखारविन्दं मुखकमलं तस्य मधुपो भ्रमर इव नीलत्वात् मुखपानकर्तृत्वाच्च पुनः कीदृशः त्रैलोक्यमस्य त्रैलोक्यस्य या मौलिस्थली मुकुटस्थली तस्य नेपथ्योचितं अलंकारयोग्यं नीलरत्नमिव इन्द्रनीलमिव स्थितं पुनः कीदृशः अवनी भारावतारो भूभारावतरणे तेनः समर्थः पुनः कीदृशः स्वच्छन्दानां स्वाधीनानां व्रजसुन्दरीजनानां गोपीनां मनस्तोषं चित्तप्रीतिं प्रददातीति प्रदोषः प्रभात इव स्थितः विहितानां पुनः प्रति पुनः कीदृशः

[illegible]

स्मान्तमेगन्तमाह किं विश्राम्यसीति किंचित्स्थितं प्रति राधायाश्चचनं हेपथिक माधवीरनमीनुहि भांडीरनामवटकजसमीपे किं विश्राम्यसि किमित्यास्यी पने विश्रामाभावेहेतुगर्भविशेषणमाह कीदृशे कृष्णभोगिभवने श्यामस्पर्श्यस्थानेनतः श्रीकृष्णः कृष्णस्पर्शैः भोगवतः स्थानमिति राधावचनामिश्र यमार्पकाणीनाविष्यनिवारजनितरोषाभिप्रायं मन्याह हे पान्थ हेयन्यो वं यानन्दनं दासदं कथं न यासि न गच्छसि कीदृशं यतः स्थानात् दृष्टिगोचरेवं सुविषयं न स्यानन्दजनान्तदोष इत्यभिप्रायः ततः केचिल्लन्दग्गामस्याः अधगमुत्वान् राधाया तद्वचनं श्रुत्वानन्दन्ति हर्षं प्राप्नुवन्ति ॥ पुनः गो विन्दस्य गिरेवाशयः जयन्ति सर्वोत्कर्षेण वर्तन्ते उत्कर्षहेतुगर्भविशेषणमाह कीदृश्यो गिरः वायु कालीनस्यानिपे: स्निग्धत्वमपि प्यारोगर्भे

किं विश्राम्यसि कृष्णभोगिभवने भांडीरभूमीरुहि भ्रातर्याहि न दृष्टिगोचरमितः सानन्दनन्दास्पदम् राधामावचनं तदध्वगमु खान्नन्दन्ति केचित्सुहृ गोविन्दस्य जयन्ति सायमतिथेः स्निग्धा गर्भा गिरः ॥ ३ ॥ इति श्रीगीतगोविन्दे वासकसज्जावर्णने नाम पञ्चमः सर्गः ५ ॥ अत्रान्तरे च कुलटाकुलवर्त्मपातसंजातपातक इव स्फुटलाञ्छनश्रीः वृन्दावनान्तरमदीपयद् अंशुजालैर्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥ १ ॥

आशयो यासां ताः अथ ध्वानएव ग्रामस्यागोविन्दस्यगिरो वाणीः श्रुत्वा जयन्ति आनन्दपूर्णा भवन्ति पिशेषणं तथैवाम् ॥ ३ ॥ इति श्रीगीत गोविन्दे नारायणदासकृतायां पञ्चमः सर्गः अधुनाचन्द्रोदयेन राधायाविरहव्याधिकं वर्णयन्नाह अत्रान्तरेति अत्रान्तरे अस्मिन्नवसरे इन्दुश्चन्द्रः अंशुजालैः किरणस मूहैः वृन्दावनान्तरं वृन्दावनमध्यप्रदेशं अदीपयत् प्रकाशितवान् कीदृशः इन्दुः स्फुटा व्यक्ता लाञ्छनश्रीः कलङ्कशोभा यस्य कथंभूत इव कुलटानामभिसारिकाणां कुल सम्मूहस्य वर्त्मपातेन मार्गप्रतिरोधेन संजातपातक इव उत्पन्नपाप इव पुनः कीदृशः दिक्सुन्दर्यः नायिकास्तासां वदनस्य मुखस्य चन्द

२०

श्रीजयदेवेति। जयदेवकवेरुदितं भाषितमिदं गीतं रसिकजनं भक्तजनं अतिशयेन मुदितं हर्षयुक्तं तनुतां करोत्वित्यर्थः॥८॥ विपुलेति हे कितव धूर्त वंचक सा मृगाक्षी र
तिरसप्रवाहे रसजलधिनिमग्ना ध्यानसागरे निमग्ना लीना वभूवेत्यध्याहारः। किंकृत्वा अमन्दं कन्दर्पचिन्तां मदनः कामस्य चिन्तां चिन्तनं स्मरणं विधाय
कृत्वा कीदृशी ध्यानेन वेधचिन्तनेन लग्ना तल्लीना। पुनः कीदृशी विपुला महती पुलकपालिः रोमपंक्तिर्यस्याः सा ध्याने कल्पितस्य तव करस्पर्शेन रोमाञ्चितेत्यर्थः
पुनः कीदृशी वहन्ती नानारिरंसु परिकल्प्य स्फुरितसीत्कारं प्रवृद्धसीत्कारं यथास्यात्तथा अभ्यन्तरे जनित उत्पादितः जडिमा जडता यस्यां क्रियायां तथ
था भवति तथा काकुना ध्वनिविकारविशेषेण आकुलं यथा स्यात्तथा व्याहरन्ती ध्यानेन तव करं नीवीबन्धमोचनार्थं परिकल्प्य निषेधवाक्यं वदती

श्रीजयदेवकवेरिदमुदितं रसिकजनं तनुतामितिमुदितम्॥८॥ विपुलपुलकपालिः स्फीतसीत्कारमन्तर्जनितजडिमकाकुव्याकुलं व्याहरन्ती॥
तव कितव विधायामन्दकन्दर्पचिन्तां रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी॥१॥ अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि संचारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशतव्यासक्तापि विना त्वया वरतनुर्नैषा
निशां नेष्यति॥२॥

त्यर्थः। अङ्गेष्विति। एषा वरतनुः सुन्दराङ्गी एषेति बुद्धिप्रत्यक्षीकृत्य वदति राधा अङ्गे कुचस्तनादि आभरणं अलंकारं बहुशः करोति रत्नानाकल्प्य कः पत्रे
ऽपि पत्रेऽपि संचारिणि चलिते सति त्वां प्राप्तमागतं परिशङ्कते तर्कयति एते न विकल्पकः शय्यां शयनीयं वितनुते कुरुते रचयति एतेन
तल्परचनां चिरं ध्यायति चिन्तयति कुसुमसंगमे मया कृतमिदं कर्तव्यमिति अनेन संकल्पलीलाशतम् इति पूर्वोक्तप्रकारेण आकल्पो
भूषणं विकल्पस्तर्कः तल्परचना शय्यारचना संकल्पलीलाशतेन व्यासक्तापि एषा वरतनुर्वामा त्वया विना निशां रात्रिं न नेष्यति

गीतगोविंद०
सटिप्पणम्०

॥७॥ [illegible]

कुसुमेति ॥ स्रगपि पुष्पमाल्यपि अतनुशरलीलया कामबाणविलासेन मां हृदि हन्ति कीदृशीं मां कुसुमवत् पुष्पवत् सुकुमारा कोमला तनुः शरीरं यस्याः कीदृश्या अतनुशरलीलया अतिविषमं शीलं स्वभावो यस्याः पीडने करित्वात् किं पतेन नुपुष्पादिना ॥ अहमिति गणितवनवेतसा गणिताः प्रतिलेखं कुसुमसन्ने [illegible] तावन्न वेतसा यया सा अहमिह कुंजे किं न निवसामि अतनव [illegible] निवसामीत्यर्थः ॥ [illegible] चेतसापि न स्मरति आश्चर्यमित्यर्थः ॥ अहरिचरणौ शरणं [illegible] जयदेवकविना भारती गीतं तन्मानसे वसतु कीदृशी भारती कामस्य [illegible] कलावती कविलकलायुता चकार [illegible] मधानायकस्य

कुसुमसुकुमारतनुमतनुशरलीलया ॥ स्रगपि हृदि हन्ति मामतिविषमशीलया ॥२॥ अहमिह निवसामि न गणितवनवे
तसा ॥ स्मरति मधुसूदनो मामपि न चेतसा ॥७॥ हरिचरणशरणजयदेवकविभारती ॥ वसतु हृदि युवतिरिव कोमल
कलावती ॥८॥ तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभिर्बद्धो बन्धुभिरन्धकारिणि वनोपान्ते किमुद्भ्राम्य
ति ॥ कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः संकेतीकृतमंजुवंजुललताकुंजेपि यन्नागतः ॥९॥

कोमलकलावती सुकुमारांगी चतुःषष्टि कामकलायुक्ता ॥८॥ कृष्णस्य विलम्बे तर्कमाह । तत्किमिति कान्तः कृष्णः संकेतीकृतः अभिसरणस्थाने मंजु
तः मंजुर्मनोहरः वंजुला लता कुंजे वनसवने नाद्य हं तनिमिलम्बि पथ्या नागतो नभ्रान्तः तत्तस्मात्कारणात्कामपि कामिनीं नापि कामभिसृतः अनुगतः
किं वा अथवा बन्धुभिर्मित्रैः कलाकेलिभिर्हास्यादि क्रीडाभिर्बद्धो बंधितः उत अथवा अंधकारिणि तमोयुक्ते वनोपान्ते वनसमीपे भ्राम्यति किं नभ्रमति
मार्गभ्रमात् भ्रमणं कुर्वन्नेव अथवा तस्य प्रमाणमात्रः इति चेत्तत्राह कान्तः [illegible] क्लान्तमना [illegible] मनागपि पथि प्रस्थातुं नागपि अल्पमपि

२१

प्रसृतीतिसाराधाविरचितः कृतः विविधो नानाप्रकारो विलापो यस्मिन् तमुच्चैर्महान्तंपरि तापं दुःखं च कारकस्मिन् सति शशाधरबिम्बे चन्द्रमण्डले प्रसरति उदितेसतिमा
धवे केलिकुञ्जे च विहितविलम्बे कृतविलम्बे सति विधुरा विकला ॥१॥ गौडमालवरागः ॥ विलापमेवाह गीतेन । कथितेति । हे सखि स्वचित्तसम्बोधनमिदम् । निर्जने सखीजनस्य
वचनैः कृष्णागमनवेदकैर्वञ्चिता प्रवञ्चिताहं कं पुरुषं शरणं रक्षितारं यामि गच्छामि किं तु के मेव मरणं यामि जलप्रवेशो वा हिमन्यपः सिमितो प्यन मालूय
हरिर्नागतः ॥ हरिः हेसखि कथितसमये पि उक्तकालेपि वनं वृन्दावनं संकेतस्थानं न यदौ न जगाम तत्सम्भोगाभावान्मम मेतदनुरूपं योग्यमपि यौवनं
विफलं निरर्थकम् ॥१॥ यदिति यत्पदं तदनुगमनाय कृष्णस्य अनुगमनाय मुरेन न संतोषयितुं निशि रात्रौ

प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा विरचितविविधविलापं सा परितापं चकारोच्चैः ॥१॥ गौडमालवरागे प्रतिमठताले
कथितसमयेपि हरिरहह न ययौ वनम् । मम विफलमिदममलरूपमपि यौवनम् ॥१॥ यामि हे कमिह शरणं सखीजनवचनवञ्चिता ॥ध्रु॥
यदनुगमनाय निशि गहनमपि शीलितम् । तेन मम हृदयमिदमसमशरकीलितम् ॥२॥ मम मरणमेव वरमतिवितथकेतना । किमिह
विषहामि विरहानलमचेतना ॥३॥ मामहह विधुरयति मधुरमधुयामिनी । कापि हरिमनुभवति कृतसुकृतकामिनी ॥४॥ अहह कलये
मामिवलयादिमणिभूषणम् । हरिविरहदहनवहनेन बहुदूषणम् ॥५॥

गहनमपि निर्जनवनमपि शीलितं तेन कृष्णेन तदनु मम मे हृदयं चेतः असमशरोः कामेन याकीलितं विद्धं कृष्णागमनाभावात् ॥२॥ ममेति इह वने
मम ... वेन नागतानर्थहत्या विरहानलं विषहामि किमिति विषहामि सहे मतस्मान्मम मरणमेव वरं श्रेष्ठं मरणे विरहानलाभावात् कीदृश्यहं अति
वितथमति वृथा केतनं शरीरं यस्याः कृष्णनशरीरमेव वृथा ... ॥३॥ मामिति ... मादिमणिभूषणं कंकणप्रभृति भूषणं

गीतगोविन्द० सलिलकम्०

[illegible]

विपुलेति पुनः कीदृशी विपुला बहुलाः पुलकाः रोमाञ्चा यस्याः सा पृथुः महान् वेपथुः कंपो भंगः तरंगः इव यस्याः पश्चात् कर्मधारयः पुनः कीदृशी श्वसितमुकुलिताया सञ्जनिते
निःश्वासनिमीलितं परमानन्दावाप्तिजनितं नेत्रनिमीलनं तेनापि विकसन् प्रकटीभवन् अनंगः कामो यस्याः यानि मीलितेत्यनेन ... कालः सूचितः ॥६॥
श्रमेति पुनः कीदृशी श्रमजलकणभरेण सुभगा मनोज्ञा श्रमजलबिंदुदिग्धत्वेन सुभगं शरीरं यस्याः सा एतेन सात्विकभावोत्पत्तिः सूचिता सात्विकभावाः
स्वेदस्तंभादयः पुनः कीदृशी उरसि वक्षःस्थले परिपतिता आपतिता रतिं सुरतं रण इव तत्र धीराः कुशला ॥७॥ श्रीजयदेवेति । श्रीजयदे
वेति । श्रीजयदेवेन भणितम् उक्तं ... ... हरिचरितं सम्भोगं कलिकलुषं कलियुगपापं प्रशमयतु कीदृशं हरिरमितमतिललितं मनो

विपुलपुलकपृथुवेपथुभंगा श्वसितनिमीलितविकसदनंगा ॥६॥ श्रमजलकणभरसुभगशरीरा ॥ परिपतितोरसि रतिरणधीरा ॥७॥ श्रीजयदेव
भणितमतिललितम् ॥ कलिकलुषं प्रशमयतु हरिचरितम् ॥८॥ विरहपाण्डुमुरारिमुखाम्बुजद्युतिरयं तिरयन्नपि वेदनाम् ॥ विधुरतीव तनोति मनो
भुवः सुहृदये हृदये मदनव्यथाम् ॥१॥ गुर्जरीरागे एकतालीताले ॥ समुदितमदने रमणीवदने चुंबनवलिताधरे ॥ मृगमदतिलकं लिखति सपुलकं
मृगमिव रजनीकरे ॥२॥ रमते यमुनापुलिनवने विजयी मुरारिरधुना ध्रुवपदम् ॥

हृदं ॥१॥ विरहेति हे सखि ... सर्वांग प्रतिश्रुते अयं विधुः चन्द्रः मम हृदये मदनव्यथां कामपीडां मनोभवस्य ... तनोति विस्तारयति ... दीपकं
... भावत्वात् कीदृशो विधुः विरहेण वियोगेन पाण्डुवत् मुरारेः मुखाम्बुजं कृष्णमुखकमलं तस्य द्युतिः शोभा ... पुनः कीदृशः वेदनामपि तनोति मे
... पुनः कीदृशः मनोभुवः कामस्य सुहृत् मित्रं ॥१॥ पूर्वगीतेन ... ... भर्तृ ...
... ॥२॥ समुदितेति ... रतिगृहे ... पार्श्वे ... विश्राम ...
... अद्य ... ... मृगमदतिलकं ... ... वदने ...

॥४३॥ [illegible]

२२

[illegible]

अथानन्तरं रूपं य यामा च वंश समन्तरे या विना आगतां सखीं वीक्ष्य दृष्ट्वा एतद्गीतेन च रूपमाणामाह कीदृशीं सखीं विषादेन कापि मिथ्या मूकां वक्तु मशक्तामिव । कोऽसौ राधा जनार्दनं कृष्णं कयापि कामिन्या रमितं कीदृशं विशंकमाना नातर्कयन्ती । दृष्टवत् कामिन्या सहितं कृष्णं दृष्ट्वेव प्रत्यक्षवत् यथा दृष्टा अभिधीयते तथा सोत्कण्ठा राधा उन्मादिनी उक्तिः ॥१॥ वसन्तरागः दृष्टवदिति यद्गीतं गीतेनाह स्मरेति हे सखि कापि युवतिः कामिनी मधुरिपुणा कृष्णेन सह विलसति क्रीडति कीदृशी अधिकगुणा मत्तोऽतिशयितसौन्दर्यादिगुणा पुनः कीदृशी स्मरसमरोचितः कामयुद्धे योग्यः विरचितः कृतः वेशो नेपथ्यं कारादि यया पुनः कीदृशी गलितकुसुमं यथा तथा दरं ईषद् विलुलिता ईषद्विगलिता केशा यस्याः सा ॥१॥ हरीति पुनः कीदृशी हरिपरिरंभणेन आलिंगनेन वलितः

अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकाम् ॥ विशंकमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह ॥ वसन्तरागे यतितालेन गीयते ॥ स्मरसमरोचितविरचितवेशा ॥ गलितकुसुमदरविलुलितकेशा ॥१॥ कापि मधुरिपुणा विलसति युवतिरधिकगुणा ॥ ध्रुवपदम् ॥ हरिपरिरंभणवलितविकारा ॥ कुचकलशोपरि तरलितहारा ॥ विचलदलकललिताननचन्द्रा ॥ तदधरपानरभसकृततन्द्रा ॥३॥ चंचलकुण्डलदलितकपोला ॥ मुखरितरसनजघनगतिलोला ॥४॥ दयितविलोकितलज्जितहसिता ॥ बहुविधकूजितरतिरसरसिता ॥५॥

जितः कृतो विकारः कामो द्वेषो यया सा पुनः कीदृशी कुचकलशोपरि तरलितं कम्पितं हारो यया सा ॥ विचलदिति पुनः कीदृशी विचलद्भिः कम्पमानैः अलकैः चूर्णकुन्तलैः ललितः [illegible] आननचन्द्रो यस्याः सा पुनः तदधरपानरभसेन कृता तन्द्रा येन सा [illegible] दयितेन विलोकिता [illegible] बहुविधं नानाप्रकारं कूजितं यत्र तादृशो यो रतिरसः क्रीडारसस्तेन रसिता हृष्टा ॥५॥

टिप्पः पद्यचिन्हं विकारे ... तिविष्टः ७

धरतीति भूचरणा किसलये पादपल्लवे यावकभरं अलक्तकपूरं जनयति करोतीत्यर्थः कीदृशे ... किसलये हृदियोजिते हृदये नानुरागातिशा पात्सहृदये स्थापिते सहृदये तत्परां कृष्णतया यावकं रचयतीत्यर्थः कीदृशे कमलानिलये लक्ष्म्या आश्रये कीदृशे चरणकिसलये नखाग्रमणिगणा पद्मरागादि लक्षमूहस्तैः पूजिते अर्चिते कीदृशं यावकभरं वासमाच्छादकं बहिर्भूतं लं आवरणं यस्य स्पष्टमित्यर्थः न लंतरमिति ॥६॥ रमयतीति हे स खि खलहलधरसोदरे खले हलधरसोदरे कृष्णे रमयति कामपि सुदृशं अन्यां नायिकां सह यौवनतया गुणादिभिस्तु त्वं यथा स्यात्तथा रमय कीडयति इह विटपोदरे वनान्ते अफलं निःफलं यौवनं विरसं रसरहितं यथा स्यात्तथा चिरं बहुकालं किं न वसं स्थिता ॥ इह सखिवरका यपक स्वसोद र

चरणकिसलये कमलानिलये नखमणिगणपूजिते ॥ बहिरपवरयं यावकभरं जनयति हृदि योजिते ॥६॥ रमयति सुभृशं कामपि सुदृशं खलहलधरसोदरे ॥ किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे ॥७॥ इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके ॥ कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके ॥८॥ नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणं ॥ पश्याद्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणैरुत्कण्ठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ॥९॥

इतिसाभिप्रायं स्वकृतं श्लोकं व्याचष्टे नाम इहेति इह कविनृपजयदेवके कलियुगचरितं कलियुगस्य दुरितं पापं न वसतु नितिष्ठतु ... कीदृशे रसभणने रसस्य श्रृंगार रसस्य भणनं यस्मिन् कीदृशे कृतहरिगुणने कृतं हरेर्गुणानां विनंनये न येन कीदृशे मधुरिपोः कृष्णस्य पदसेवके ॥८॥ कृष्णस्यानागमनात् दुःखितां सखीं माधवसखीत्याह नायात इति हे सखि दूति दूते यत्स्य ... यदि निर्दयो ... मातः ... कृष्णो नायात त्वं किं दूयसे ... अनागमने कारणमाह बहुवल्लभः ... स्वभावः प्रियोपगतः कृष्णः ... पश्यैति ... अथ तां ... ति ॥९॥

घने निघनचपलउच्चिरे मेघसमूहवन्मनोहरे चिकुरे केशपाशे कुरवककुसुमं रक्तगेंदाप्रच्छरयति पथा स्याननमध्ये पतितः नः कीदृशे अलिरसितानि चंचरीकगानानि तै
गानामाननानि येन अतिसुन्दरतयेत्यर्थः कीदृशं कुसुमं चपलायतं विद्युदिव सुरमारोभायस्य तस्मात् सा या अहितता च विद्युत्साम्यं पुनः कीदृशे रतिपतिः का
मः स एव कुरंगस्तस्य कानने यथा मृगवासोवने तथा चिकुरे कामवृत्तिः कामजनक इत्यर्थः अन्यस्मिन्नपि मेघे विद्युन्ध्वनितं स्तुवन्तां नां मेघसमूहः कामो
दिभाविजनकः निमेघौ स्नेहरीता नामप्यति सुवंसमुत्पद्यते ॥२॥ कुचयुगे निसुघने निविडे कुचयुगगगनेस्तनद्वयाकाशे मलं निर्मलं स्मरसार्थं मुक्ताहारं
तरलतारकं पदसे नक्षत्रसमूहं प्रेरयति योजयति मृगमदरुचिः कस्तूरीदीप्तिस्तया भूषिते पुनः कीदृशेन रवपदं नवक्षतं तदेव शशिशकलं द्वितीयाचन्द्रस्तेन भूषिते
घनचपलउच्चिरे रचयति चिकुरे करसितकुरवा नने ॥ कुरवककुसुमं चपलासुखमं रतिपतिमृगकानने ॥२॥ कुचयुगे सुघने कुचयुगगगने मृगमदरुचिभूषिते ।
मणिसरसममलं तारकपटलं नखपदशशिभूषिते ॥३॥ जितबिसशकलं मृदुभुजयुगले करतलनलिनीदले । मरकतवलयं मधुकरनिचयं वितर
हिमशीतले ॥४॥ रतिगृहजघने विपुलापघने मनसिजकनकासने । मणिमयरसनं तोरणहसनं विकिरति कृतवासने ॥५॥
अर्धचन्द्रेण गगनपदेन भ्रमनामेघापतितः घनसाहयं पदे दाक्षे वितारे लोहमुक्तानिबन्धः ॥३॥ जिते निमृदुभुजयुगले कोमलबाहुद्वये मरकतवलयं मरक
तमणिखचितं कंकणमेव मधुकरनिचयं भ्रमरसमूहं वितरति ददाति भूषणीत्यर्थः कीदृशे भूयुग्मे जितबिसे सकले भ्रमरसमूहमिव तिष्ठतीति रूपालंकारः ॥४॥ रतिगृह
रतेः शृंगारस्य गृहे आश्रये जघने नितम्बे मणिमयरसनं मुक्तामयीं मेखलां वितरति ददाति कीदृशे जघने विपुलो महत्तरो पघनः शरीरं यस्य अतिमांसल इ
त्यर्थः पुनः कीदृशे मनसिजस्य कामस्य कनकनिर्मितं सिंहासनमिव कीदृशं मणिमयमयं नतोरणस्य वन्दनमालिकायाः ॥५॥ हसनं निन्दकं यद्राजासिंहास
ने उपविशति तत्रावन्दनमालिका बध्यते कृतवासने कृतं वासनं यस्मिन् तथोपरिस्थितं बधाननीयर्थः यद्वा कृतं तेन वासनं स्यानं यत्र वासने

गीतगोविं० सतिलक०

पि सुवन्तं मलयानिलं संप्रार्थयते मनोभवेति हे मनोभवानन्दन कामप्रमोदजनक चन्दनानिल मलयजवात प्रसीद मम पर्यवस्थितो सं वद त्वापेक्षसंबोधनं दक्षि
णत्वात् दक्षिणा वामतां प्रतिकूलत्वं मुञ्च त्यज जगत्प्राण हे जगतां प्राणभूत क्षणमात्रं माधवं पुरो विधाय मदग्रे कृत्वा मम प्राणहरो भविष्यसि मम दर्शने
न प्रतिदुःखं भविष्यति जगतां प्राणा स्नेन मनुचित मिति भावः वामं सव्ये प्रतीपे च द्रविणोत्तिले मुन्दरेति विश्वः दक्षिणा परछंदानुवर्तिनि सरले इति विश्वः ॥१॥ पुनरपि मन्दं
प्रत्याह रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो विषमिव सुधारश्मिर्यस्मिन् दुनोति मनोगते हृदयमदये तस्मिन्नेवं पुनर्वलते बलात् कुवलयदृशां वामः कामो निकामनिरङ्कुशः
सखीभिः सह वासो वसतिः अपि रिपुरिव शत्रुरिव हिमानिलो शीतलवातः
शिखीव अग्निरिव मम मनो अतिदुनोति सुधारश्मिश्चन्द्रोऽपि विषमिव दुनोति तस्मिन् हृदये कृष्णे सदये निर्दये एवंविधोऽपि मम मनः पुनरपि बलात् तत्र गत्वा

मनोभवानन्दन चन्दनानिल प्रसीद रे दक्षिण मुञ्च वामताम् । क्षणं जगत्प्राण विधाय माधवं पुरो मम प्राणहरो भविष्यसि ॥ रिपुरिव सखीसंवासोऽयं शि
खीव हिमानिलो विषमिव सुधारश्मिर्यस्मिन् दुनोति मनोगते हृदयमदये तस्मिन्नेवं पुनर्वलते बलात् कुवलयदृशां वामः कामो निकामनिरङ्कुशः ॥२॥
बाधां विधेहि मलयानिल पञ्चबाण प्राणान् गृहाण न गृहं पुनराश्रयिष्ये । किं ते कृतान्तभगिनि क्षमया तरङ्गैरङ्गानि सिञ्च मम शाम्यतु देहदाहः ॥३॥
सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरादानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दीवरं स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं ॥
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥४॥ ❁ इति श्रीगीतगोविन्दे विप्रलब्धावर्णने नागरनारायणो नाम सप्तमः सर्गः ॥७॥ ❁ ॥

संगच्छते नीयमानोऽपि तत्रैव निर्गच्छतीत्यर्थः पतः कुवलयदृशां नीलोत्पलाक्षीणां नारीणां वामः क्रूरः कामो निकामः निरङ्कुशः अतिशयेन स्वच्छन्दचारी अपरतन्त्र इ
त्यर्थः ॥२॥ पुनरपि जीवितनिरपेक्षत्वेन मलयानिलपञ्चबाणौ प्रत्याह बाधामिति हे मलयानिल त्वं बाधां पीडां विधेहि हे पञ्चबाण त्वं च मम
प्राणान् गृहाण पुनरपि गृहं नाश्रयिष्ये नायास्यामि न प्राणान् गृहाणेत्यर्थः हे कृतान्तभगिनि यमुने तव क्षमया त्वं किं त्वं मम
अङ्गानि तरङ्गैः सिञ्च प्रक्षालय नोचितेति भावः तरङ्गैः सिञ्च मम देहदाहः शाम्यतु मरणमेव भवतु इत्यर्थः ॥३॥ सो इति

अनिलेति हे सखि या नायिका वनमालिना कृष्णेन रमिता क्रीडिता सा किसलयशयनेन पल्लवशय्यया न तपति अथ च वनमालिना यामुनातटे यथा येषां यत्किंचनपल्लवशय्यानेतरमानेन
तस्मै दत्तमत्तेन सर्वरसानाम् अवलोकनादिति भावः अस्मिन् गीते संभोगवियोगौ ज्ञातव्यौ ॥१॥ विकसितेति विकसितं प्रफुल्लं यत्सरसिजं कमलं तद्वत् ललितं सुन्दरं मुखं यस्य
तेन एवंभूतेन वनमालिना या रमिता सा मनसिजविशिखेन कामबाणेन न स्फुटति न विदीर्णा भवतीति संभोगे वियोगे तु सा न स्फुटत्येवेति काकुः ॥२॥ अमृतेति अमृतवत् मधुराणि मृदुतराणि अतिकोमलानि वचनानि वाक्यानि यस्य तेन वनमालिना या रमिता सा मलयजपवनेन मलयानिलेन न ज्वलति न संदीप्यते संभोगे वियोगे तु
ज्वलत्येव ॥३॥ स्थलेति स्थलजं जलजं च रुहाणां स्थलपद्मानां रुचिरिव रुचिर्ययोस्तादृशौ करचरणौ यस्य तेन वनमालिना या रमिता सा हिमकरकिरणेन चन्द्र-

रश्मिना न लुठति ॥४॥ अनिलतरलकुवलयनयनेन तपति न सा किसलयशयनेन ॥१॥ हे सखि या रमिता वनमालिना ॥ ध्रुवम् ॥ विकसितस-
रसिजललितमुखेन स्फुटति न सा मनसिजविशिखेन ॥२॥ अमृतमधुरमृदुतरवचनेन ॥ ज्वलति न सा मलयजपवनेन ॥३॥ स्थलजलरुह-
रुचिकरचरणेन लुठति न सा हिमकरकिरणेन ॥४॥ सजलजलदसमुदयरुचिरेण ॥ दहति न सा हृदि विरहभरेण ॥५॥ कनकनिकषरुचिशुचि-
वसनेन ॥ श्वसिति न सा परिजनहसनेन ॥६॥ सकलभुवनजनवरतरुणेन वहति न सा रुजमतिकरुणेन ॥७॥ श्रीजयदेवभणितातरमतो
न प्रविशतु हरिरपि हृदयमनेन ॥८॥

दीर्घत्याज्जन दहति नोपतप्ता भवति अविवक्षितत्वात् कर्मभावः इति संभोगे वियोगे तु न दहति अपि तु दहत्येव स्थलपद्मस्याति लोहितत्वेनोपादानं ॥४॥
सजलेति सजलजलदसमुदयवत् मेघसमूहवत् रुचिरो सुन्दरो यो वनमालिना युग्मिता सा हृदि मनसि विरहभरेण वियोगेन न दहति न दग्धा
भवति इति संभोगे वियोगे तु न दहतीति अपि दहत्येव ॥५॥ कनकेति कनकनिकषस्य सुवर्णरेखायाः रुचिरिव रुचिर्यस्य तादृशं शुचि विमलं वसनं वस्त्रं यस्य पीताम्बरो
यस्य तेन वनमालिना या रमिता सा परिजनहसनेन सखीजनहासेन न श्वसिति दीर्घं न श्वसिति संभोगे वियोगे तु श्वसित्येव कृत्स्न

वृद्धिर्लोहित्यंस तेन वपुः शरीरं तु तिर्जय लेखं सुरतविजयप्रशस्तिलिखितमनुकरोतीति कोहसं वपुः कम [illegible] कामिनी [illegible] तां [illegible] नवानां द्वितान्ये [illegible] स्वाप [illegible]
नो न [illegible] कविता निर्मिता [illegible] सुवर्णा [illegible] न्याक्षेपस्मिन् [illegible] ॥७॥ [illegible] मनोहरं [illegible] मदनकुसुम [illegible]
[illegible] शब्दपरिचायं [illegible] पल्लव [illegible] [illegible] मात् [illegible] [illegible]
[illegible] पदेनेव नूतनत्वाभिधानात् [illegible] नवलक्षणं [illegible] परिहारः परिकरे [illegible] ॥ [illegible] रगतं [illegible]
वर्तमान [illegible] अन्यकामिनी [illegible] मम चेतसि [illegible] संतापं जनयतीति [illegible] इत्यर्थः [illegible]

॥२१॥ [illegible] ॥ [illegible] हृदयमुदारं । [illegible] [illegible] ॥ [illegible] रगतं [illegible] जनयति
चेतसि खेदम् ॥ कथयति कथमधुनापि [illegible] ॥ [illegible] ॥ [illegible] मनोपि [illegible] नूनम् ॥ कथमथ वंचयसे
जनमनुगतमसमशरज्वरदूनम् ॥७॥

[illegible] नकथयतीत्य [illegible] र्थः [illegible] नास्तीति स्थितः [illegible] मिति [illegible] ॥ [illegible] ॥ [illegible] नूनं [illegible]
[illegible] मपि [illegible] भविष्यती [illegible] ति नूनं तर्कयामि [illegible] आह अथ [illegible] गतं [illegible]
[illegible] असमशरः कामः [illegible] ॥८॥ भ्रमतीति । अथवा [illegible] सनार्थं
भवान् अरण्येषु भ्रमति [illegible] किंचित् [illegible] पूतनिकै [illegible] रहितं [illegible] चेष्टितं [illegible]
[illegible] नाम [illegible] ॥१०॥
चन्दन [illegible] मपि [illegible] ॥ [illegible]

२५

[illegible]

अथ पुनरा राधाप्रियं प्रातरागतं कृष्णमभ्यसूयं स्त्वेनमवाह अथेति अथानन्तरं कदाचिदपि पद्मिनीं वाचिंविनी वा स्थिता समं राधा प्रियं केसर साभ्य

सूयसे कं प्रपालया श्री संत वनी की हसी सम्पश्यरे : कामसंयोगेन जोदितापि विदूपि को श्रुंगभेत प्रातः समये : पुनः प्रवचनं यन्त्र नाम्प्रवो धयवत

नेत्रा स्पृष्टव लन्तं की दृशं अनेन प्रगतमपि अत्र स्वयिरता वयपितेन धेनुरवां उत्स्वंयसन प्रभासा प्रेमानन्यो पभोगवान् भोगवत्समंकित मानराग

[illegible] हलीहि ववदिङ्केतेति ॥१॥ अभ्यसूया वचनमेवाह रजनीति मे स्वीरागः रागस्तम्भ स्व रागस्व्ये स्फुटिकस्यमं प्रसरो जु हे: शंकरमवप नी

प्रमेद प्रतिप न्तागीता गोरीत नुर्नामत मे रुचीयमिति । हरिहरि रवेरानुकारे ध्यायं हे केशव नपा हि गच्छ हे माधव कहि कोपचिस्मन हि हि

अथ्यंक पद्मपि पार्श्विनीं चिनीप स्मरशा जर्जरीति तापिसाप्रभाते अनुनय वचनं वदन्नं गमपगतमपि प्रियमहसाम्पसृपं प्राभेवरागेन

कृतोसे । रजनिजनितगुरुजागररागकषायितमलसनिमेषम् । वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम् ॥ ध्रु ॥ हरिहरि

याहि माधव याहि केशव मा वद कैतववादम् तामनुसर सरसीरुहलोचन या तव हरति विषादम् ॥ ध्रु ॥ कज्जलमलिनविलोचन

चुम्बनविरचितनीलिमरूपम् ॥ दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम् ॥ ३ ॥ वपुरनुहरति तव स्मरसंगरखरनखरक्षतरेखम् । मरकत

शकलकलितकलधौततटिरिव जंगपुलेखम् ॥ ४ ॥

कैतववादं वंचक रूपं त्वामवं मा वद हे सरसीरुहलोचन कमलनयन मां नाधिका मनुसर अनुगच्छ मा तव विषादं मनस्तापं हरति दूरीकरोति कथं कैतववादत्वमित्यत आहे रजस

नवनपनस्फुट प्रकटितस्पानुरागमिव वहति धारयति कीदृशं नयनं रजनिजनितेन गुरुणा सातिशयेन जागरेण जागरोत्पन्न अहित रागमापं काषायितमाजी [illegible] नः कीदृश

रात्रिजागरेणालसा निमेषः पक्ष्म चलनं यस्य कीदृशं अनुरागं उदितरसाभिनिवेशं उदितः [illegible] अन्यकामिनीविषयक शृंगार रसस्याभिनिवेश [illegible] नमापापा

मात नेत्रेन नूपलमन्यस्यानुरागः सूचितस्तु ॥ २ ॥

रतिपु [illegible] तेरु ५

हीरिति। अयि हे मानिनि अभिमानवति राधे माधवे कृष्णे मानं अभिमानं मा कुरु मा कार्षीरिति प्रार्थनायां लोट् पतो मधुपवने वसन्तवायौ वहति सति हरिरभिसरति त्वय्येव त्वदीय संकेतभूमिमागच्छतीति हे सखि राधे भवने। गृहेऽपि अपरं अधिकं सुखं अतिशयसुखं किं अपितु न किमपि नायकस्य स्वयमागमनात्कोपोऽनुचित इत्यर्थः तालेति हे राधे तालफलादपि कठिनमनस्यो(?)लेन वर्तुलत्वेन च तालफलादपि गुरु अधिकं कुचकलशं स्तनघटं किं किमिति विफलीकुरुषे कस्मै(?) हरिव्यापारपरिशीलनाभावात् कीदृशं अतिसरसं अतिरसयुक्तं तस्मिन्द... पूर्वारसाविर्भावात् हरिः पारस्यादरक्रमिति यावत् भिन्नमन्याय वचनेनांगने तारिके स्फुट इति विश्वः देनेवे चैत्रे वसन्ते च जीवाकाशे मधुमहइति विश्वः॥२॥ कतीति हे राधे इदमनुपदं स्थाने अचिरं संप्रतं कतिकति वारान् कथितमुदितं किंतु कथितम वा कतीति अतश्चाह त्वं अतिदाय तुचिरं अतिकमनीयं हरिं कृष्णं मा परिहर मावज्ञा

गुर्जरीरागः रूपकतालः॥ हरिरभिसरति वहति मधुपवने किमपरमधिकसुखं सखि भवने॥१॥ माधवे मा कुरु मानिनि मानमये॥ ध्रुवपदम्॥ तालफलादपि गुरुमतिसरसम्। किं विफलीकुरुषे कुचकलशम्॥२॥ कति न कथितमिदमनुपदमचिरम्। मा परिहर हरिमतिशयरुचिरम्॥३॥ किमिति विषीदसि रोदिषि विकला विहसति युवतिसभा तव सकला॥४॥ सजलनलिनीदलशीतलशयने हरिमवलोकय सफलय नयने॥५॥ जनयसि मनसि किमिति गुरुखेदं शृणु मम वचनमनीहितभेदम्॥६॥

॥२७॥

सीति॥३॥ किमितीति॥ विकला अस्वास्थ्येनेन्द्रियाणां किमिति कस्माद्विषीदसि दुःखिता भवसि रोदिषि परुषं (?) भाषणं नियमे(?) रोदनात् इदानीं विषादरोदनं च व्यर्थमिति सकला सर्वा युवतिसभा तव रमणीसमाजः तव तां विहसति उपहसतीति तथेति कर्मरयापि कृतिकाचिन्तु(?)॥४॥ सजलेति सजले नार्द्रे न नलिनीदले न कमलिनीपत्रे णाशीतिलिते कृते शयने शय्यायां स्थितं हरिं कृष्णमवलोकय पश्य सफलय पश्य दर्शनात्मपने नेत्रे सफलीकुरु॥५॥ जनयसीति हे राधे त्वं मनसि गुरुखेदं दुःखं किमिति जनयसि उत्पादयसि तस्मात्मम वचनं वाक्यं शृणु आकर्णय कीदृशं वचनं अनीहितं अप्रतिकूलमिति अभेदो विरहो येन भवत्या हितमेव सुखं नवदृशमिति अर्थः अतस्त्वं शृणु॥

॥६॥

26

ण्यो अयं च संभ्रमेमंगजारंभयोरपीतिविश्वमन्येशंके ध्रुवे प्रापो नूनमित्येवमादिभिः उत्प्रेक्षा व्यज्यते माधवेरिवशब्दोपिना इत्यादि श्रीजयदेवेतिहे विबुधाः पण्डिताः भक्ता इत्यर्थः

॥८॥ तवेदमितिहे कितव वंचक त्वदालोकः प्रसिद्धस्य प्रणयभरस्य प्रेमातिशयस्य भंगेन मम अपि शोकः तस्मादपि मम अद्य किमपि अनिर्वचनीयं लज्जां जनयति

कीदृशाः मम न चेदं हृदयं वक्षः स्थलं पश्यन्त्याः कीदृशं हृदयं प्रियायाः नायिकायाः पादालक्तकेन चरणयावकेन छुरितं व्याप्तं अत एवारुणा वर्णा संध्यारागव

द्योतितं शीलमस्येति अरुणां छायमिति पाठे अरुणा आरक्ता छाया कान्तिर्यस्य तादृशं हृदयमिति भावः उत्प्रेक्षते बहिः प्रसरद्दनुरागमिव बाह्यप्रसरदनुरागयुक्त

रागो हि अरुणो वर्ण्यते ॥१॥ सर्गान्ते कविः भक्तान् प्रत्याशिषं ब्रूते प्रातरिति अयं नन्दात्मजः कृष्णो जगदानन्दाय अस्तु लोकसुखाय भवतु कीदृशः ब्रीडया चं

भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम् प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ॥८॥ श्रीजयदेवभणितरतिवंचितखण्डि

तयुवतिविलापम् । शृणुत सुधामधुरं विबुधा विबुधालयतोपि दुरापम् ॥९॥ तवेदं पश्यन्त्याः प्रसरदनुरागं बहिरिव प्रियापादालक्तच्छुरितम

रुणच्छायहृदयम् ॥ ममाद्य प्रख्यातप्रणयभरभंगेन कितव त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥१॥ प्रातर्नीलनिचोलम

च्युतमुरः संवीतपीतांशुकं राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले ॥ ब्रीडाचंचलमंचलं नयनयोराधाय राधानने स्मेरं स्मे

रमुखोयमस्तु जगदानन्दाय नन्दात्मजः ॥२॥ इति श्रीगीतगोविन्दे विलक्षलक्ष्मीपतिर्नामाष्टमः सर्गः ॥८॥ अथ तां मन्मथखिन्नां

रतिरसभिन्नां विषादसंपन्नां अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहः सखी ॥१॥

[illegible] प्रातः उरसि अच्युतं दृष्ट्वा

नीलनिचोलं [illegible] अन्यया सह रात्रौ [illegible] तां [illegible] परिहासं [illegible]

प्रणयकोपभरे राधीं तथा चाटुकारमपि हरिमपश्यन्त्या पश्चात् संतप्ते मदनवह्निशिखासहस्रैर्महारात्रे व्याकुलां तु कलहान्तरितां सा सख्याह ॥१॥

॥२॥ [illegible]

इति श्रीगीतगोविन्दे नवमः सर्गः ॥ ९ ॥ इदानीं सोत्कण्ठः श्रीकृष्णः राधामनुनयन्नाह अत्रेति अत्रान्तरे अस्मिन्नवसरे हरिः दिनान्ते संध्यासमये तां मुग्धमुखीं मानामुखीं राधां समुपेत्य सानन्दानि अतएव गद्गदानि कण्ठस्खलन्ति पदानि यस्मिंस्तत् यथा भवति इति वक्ष्यमाणमुवाच कीदृशीं तां मसृणस्य अन्तरश्वासस्य अधिकं श्वास धीनां पुनः कीदृशीं अश्रीमस्य महतो निःश्वासस्य निःसहं सोढुमशक्तं मुखं यस्याः सकोपवतीमित्यर्थः पुनः कीदृशीं सव्रीडं सलज्जं ईक्षितं दृष्टं सखीवदनं यया मुखं यस्यास्तां पश्चात् कृष्णचेष्टितमिति भावः ॥ १ ॥ उक्तमर्थं गीतेनाह वदसीति देशवराडीरागः रागान्तराणि आरभ्य गमनमुग्धायूरोधामानं नयनभृङ्गमासुख शाखिनि निजरूपिते देशवराडी भवेद्रागिणि हे चारुशीले मनोहरवृत्ते प्रिये राधे मयि अनिदानं अकारणं मानमभिमानं मुञ्च त्यज किमिति मानत्यागस्त

इति श्रीगीतगोविन्दे मन्दगोविन्दो नाम नवमः सर्गः ॥ ९ ॥ अत्रान्तरे मसृणरोषवशामसीमनिःश्वासनिःसहमुखीं सुमुखीमुपेत्य सव्रीडमीक्षितसखीवदनां दिनान्ते सानन्दगद्गदपदं हरिरित्युवाच ॥ १ ॥ देशवराडीरागः अष्टतालः वदसि यदि किंचिदपि दन्तरुचिकौमुदी हरति दरतिमिरमतिघोरं स्फुरदधरसीधवे तव वदनचन्द्रमा रोचयति लोचनचकोरम् ॥ प्रिये चारुशीले मुञ्च मयि मानमनिदानम् सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानम् ॥ ध्रुवपदम् ॥ सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातम् घटय भुजबन्धनं जनय रदखण्डनं येन वा भवति सुखजातम् ॥ २ ॥

॥ ५९ ॥

त्वं मदनानलः कामाग्निः मम मानसं दहति अतः कारणात् सपदि शीघ्रमनन्तरमेव मुखकमलमधुपानं देहि मधुना वह्निः शान्तः प्रशाम्यतीति यदि किंचिदपि वदसि तदा तव दन्तरुचिकौमुदी दशनकान्तिरेव चन्द्रज्योत्स्ना अतिघोरमतिशयेन भयंकरं हरति नाशयति अनुचितयवदनचन्द्रमाः मुखचन्द्रः स्फुरदधरसीधवे दीप्यमाना धरामृतार्थं लोचनचकोरं नेत्र [illegible] सत्यमिति हे सुदति [illegible] सत्यमेव कोपवती असि तदा खरनखर बा

कीदृशं तद्वचनमित्यत आह हरिरिति हरिरपयातु आगच्छतु वा बहु मधुरं तेनाभिनयवचनं वदतु त्वं तु पुनः अतिविधुरं अतिविकलं किमिति करोषि न किंचित्प्रयोजनमित्यर्थः॥ ॥७॥ श्रीजयदेवेति श्रीजयदेवेन भणितमुक्तं हरिचरितं कर्तृ रसिकजनं सुखयतु सुखिनं करोतु कीदृशं भणितं ललितं अतिसुन्दरं सुश्राव्यमित्यर्थः॥ ॥८॥ वयस्यं प्रियं कोपेन तत्संगतीं राधां सखी इदं प्रत्याह स्निग्ध इति हे विपरीतकारिणि विपर्ययविधायिनि राधे त्वं स्निग्धे मधुरवादिनि तस्मिन् प्रियेऽपि कृष्णे यत्परुषासि परुषा भवसि यत्प्रणमति विनीते सति स्तब्धासि स्तब्धा भवसि द्वेषस्थासि यद्रागिणि अनुरागिणि द्वेषस्थासि यदुन्मुखे सन्मुखे प्रिये विमुखतां पराङ्मुखतां यातासि तत्तस्मात् कारणात् श्रीखण्डचर्चा चन्दनकृतलेपनं विषमिव शीतांशुश्चन्द्रस्तपनः सूर्य इव हिमं तुषारः हुतवहोऽग्निरिव क्रीडासंभोगः यातनाभाक्तीव भवन्तीति तव योग्यमेव॥

हरिरपयातु वदतु बहु मधुरं किमिति विधुरम्॥७॥ श्रीजयदेवभणितमति ललितं सुखयतु रसिकजनं हरिचरितम्।८। स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि। द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन् प्रिये॥ तद्युक्तं विपरीतकारिणि तव श्रीखण्डचर्चा विषं शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः॥१॥ अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविस्रंसनः स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रः कुरङ्गीदृशाम्। दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां भ्रंशः कंसरिपोर्व्यपोहयतु वो श्रेयांसि वंशीरवः॥२॥

एवं मम सखीवचनं विपरीतकारित्वात्॥१॥ इदानीं कविर्भगवन्तं मंगलाशिषं ब्रूते अन्तरिति कंसरिपोः कृष्णस्य वंशीरवो वेणुनादः वो युष्माकं भक्तानां श्रेयांसि पुण्यानि व्यपोहयतु नाशयतु कीदृशो वंशीरवः कुरङ्गीदृशां हरिणनयनानां गोपीनामन्तर्मोहनं मनोमोहः मौलिघूर्णनं मस्तकभ्रमणं तेन चलन्मन्दारविस्रंसनं गुम्फितपारिजाततरुपुष्पाधःपतनं मालिकापातन स्तब्धाकर्षणं यत्र तद्दृष्टिहर्षणं च यस्य स महामन्त्रः मोहनादि सिद्धमन्त्रो वंशीरवः ... ॥२॥ ग्र०४

कौतौ०१

स्मरतिलमुदारं मनोहरं पदपल्लवं चरणपल्लवं मम शिरसि मण्डनं अलंकारं देहि अर्पय कीदृशं स्मरगरलस्य कामविषस्य खण्डनं नाशकं कामपीडानिवर्तकमित्यर्थः मयि दारुणः कर्मा मदनकदनानलः कामपरितापवह्निर्ज्वलति दीप्यते तत्पादपल्लवं कर्त्तृ तदुपाहितविकारं मदनकृतोपतापं हरतु शिरःपीडानिवर्त्तनेन सर्वशरीरपीडानिवृत्तिरिति शिरसि दानं अथवा पल्लवेन वा छादितो ग्रासः स्वल्पतापो भवतीति॥७॥ इतीति मधुवैरिणः कृष्णस्य राधिकामधि अनुराधिकां लक्षीकृत्य इति वचनजातं वचनसमूहः जयति उत्कर्षेण वर्त्ततां चटुलं मनोहरं चाटु प्रीतियुक्तं पटु चतुरं चारु सुकुमारं पुनः कीदृशं जयदेवकवेर्भारत्या वाण्या भूषितमलंकृतं पुनः कीदृशं मानिनीजनस्य मानिनीसमूहस्य जनितं शातं सुखं येन॥८॥ परिहरेति हे कृतातङ्के विहितकोपे राधे त्वं शंकामन्यनायिकासंभोगजां परिहर मम स्वान्ते हृदये त्वद

॥२९॥

स्मरगरलखण्डनं मम शिरसि मण्डनं देहि पदपल्लवमुदारं ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपाहितविकारम्॥७॥ इति चटुलचाटुपटुचारु मधुवैरिणो राधिकामधि वचनजातं जयति पद्मावतीरमणजयदेवकविभारतीभूषितं मानिनीजनजनितशातम्॥८॥ परिहर कृतातङ्के शंकां त्वया सततं घनस्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि। विशति वितनोरन्यो धन्यो न कोपि ममान्तरं प्रणयिनि परीरंभारंभे विधेहि विधेयताम्॥१॥ मुग्धे विधेहि मयि निर्दयदन्तदंशं दोर्वल्लिबन्धनिबिडस्तनपीडनानि चण्डि त्वमेव मुदमञ्च न पञ्चबाणचण्डालकाण्डदलनादसवः प्रयान्तु॥२॥

सततमाक्रान्ते स्वान्ते सति वितनोः कामात् अन्यः कोपि धन्यो मम अन्तरमभ्यन्तरं न विशति प्रविशति कीदृश्या त्वया घने कठिनस्तनजघने यस्याः कीदृशे स्वान्ते अत एव परानवकाशिनि अन्यस्यावकाशशून्ये यतो मम अन्तरे कामो वसति अतः स्तनभरपरीरंभारंभे स्तनालिंगनारंभे आलिंगने योगे विधेयतां विधेहि आलिंगितो त्वया॥१॥ मुग्धेति हे मुग्धे मूढे सुन्दरि मयि निर्दयदन्तदंशं [illegible] विधेहि यथा स्यात् तथा स्तनाभ्यां पीडनानि

त्वमसि मे राधे त्वं मम जीवनं प्राणोसि त्वां विना स्थातुमशक्यत्वात् त्वं मम भूषणमलंकारोसि त्वं मम भवजलधिरत्नं संसारसागरनिधिरसि जातो जातो यद्रत्नं तच्च
नेद्रत्नमभिधीयते इति तस्मीयत्नं त्वमुक्तं इह एतादृशी मयि भवती सततं निरन्तरं अनुरोधिनी अनुकूला भवतु तत्रानुकूल्ये मम हृदयं मनः अतियत्नमति
शयत्नं प्रकंपं भवतीति वानुकूलार्थ अतिशययमित्यर्थः ॥३॥ नीलेति हे तन्वि कृशांगिनी नीलनलिनाभमपि नीलोत्पलसदृशमपि तव लोचनं कोकनद
रूपं रक्तोत्पलसरूपतां धारयति यत्ते क्रोधानुरागात् यदि इदं चक्षुः कृष्णं प्रणामं प्रत्युकुसुमशरः कामस्तस्य बाणाः पुष्पाणि तेभ्यो भवः उत्पत्तिर्य
स्य मधुनस्तेन रंजयसि रक्तं करोषि एतद्गुणरूपं अनुरूपं योग्यं भवति यदि मया सह मधुपानं करोषि तदा नेत्रस्य रक्तत्वमुचितं न क्रोधादिति भावः ॥

त्वमसि मम भूषणं त्वमसि मम जीवनं त्वमसि मम भवजलधिरत्नं भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नम् ॥३॥
नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपं कुसुमशरबाणभावेन यदि रंजयसि कृष्णमेतदनुरूपम् ॥४॥ स्फु
रतु कुचकुंभयोरुपरि मणिमंजरी रंजयतु तव हृदयदेशं रसतु रसनापि तव घनजघनमण्डले घोषयतु मन्मथनिदेशम् ॥५॥ स्थलकम
लगंजनं मम हृदयरंजनं जनितरतिरंगपरभागम् भण मसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकरागम् ॥६॥

स्फुरत्विति हे राधे मणिमंजरी हारलता कुचकुंभयोः स्तनकुंभयोरुपरि स्फुरतु शोभतां सा रत्नलतानर्घ हृदयदेशं रंजयतु अलंकरोतु रश्मिभिरिति शेषः तव
घनजघनमण्डले नितंबकटिप्रदेशे रसनापि कांच्यपि रसतु शब्दं करोतु सा कांची मन्मथनिदेशं कामाज्ञां घोषयतु प्रकटयतां स्यादिति हे घनमसृणवाणि
स्निग्धवचने अहं तव पदपंकजं चरणकमलं सरसलसदलक्तकरागं शोभमानः अलक्तकरागो यावकं पंको यस्मिन् तेनालंकृतं करवाणि प्रार्थनायां लोट्

॥६॥ [illegible]

इत्याचितिअहोइत्याश्चर्ये हे तन्वि सुन्दरि पृथ्वीगता भूमिस्थितापि त्वं विबुधयौवनं देवयुवतीवृन्दं अप्सरः समूहं वहसि केन प्रकारेण इत्यत आह तव दृशौ नयने मदालसे अ॥ श्लोक नाम मन्दयले वदनं तव मुख मिन्दुमत्या चन्द्रयुक्त्यान्वितं युक्तं सन्मुखदर्शनेन साध्यपावन्द्रमुखी भवतीत्यर्थः तव गतिर्गमनं जनमनोलोकमनोरमे पनीति जनमनोरमा तवोरुद्वयं विधुतरंभं जितकदलीकं तव रतिः सुरतविलासः कलावती कामकलाकौशलयुक्ता तव भ्रुवौ रुचिरचित्रलेखे रुचिराचित्रा यां लेखायये ते यथा चित्रा शृङ्गा मारयति ते थेति नदन्त्यप्सरः प्रयोजनया मदालसा इन्दुमती मनोरमा रम्भा कलावती चित्रलेखा संज्ञकाप्सरसः प्रतिपा दिताः पृथ्वीगतेन्यपि चे॥६॥ एकस्यामपि त्वयि सर्वासामप्सरसां गुणाः वर्त्तन्ते इत्याश्चर्यं प्रीतिंवइतिद्विपकः स मोदश्चान्तं स पदवचनकौशले

दृशौ तव मदालसे वदनमिन्दुमत्यन्वितं गतिर्जनमनोरमा विधुतरंभमूरुद्वयम्॥रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवावहो विबु धयौवनं वहसि तन्वि पृथ्वीगता॥६॥ प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्द्धं रणे राधापीनपयोधरस्मरणकृत्कुंभेन संभेदवान् यत्र स्विद्यति मीलति क्षणमथ क्षिप्ते द्विपे तत्क्षणात् कंसस्यालमभूज्जितं जितमिति व्यामोहकोलाहलः॥७॥ इति श्रीगीतगोविन्दे मानी चतुर्भुजो नाम दशमः सर्गः॥ श्रीः १०॥ सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवति कृतवेशे केशवे कुंजशय्यां॥ रचितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां कापि राधां जगाद॥१॥

मानेन मानिनी मानापनोदनाच्चतुरः॥७॥ इति श्रीनारायणपण्डितकृतायां संगीतगोविन्दटीकायां दशमः सर्गः॥१०॥ श्रीः अथ भाराधांप्रति सखीभूते रुचिरमति कापि सखी प्रदोषे जनीमुखे स्फुरति दीप्यमाने सति प्राप्ते इत्यर्थः राधां जगाद्वस्यमाणमिति शेषः कस्मिन् सति केशवे कृष्णे अनुनये न प्रीतिवचसा चिरं बहुकालं मृगाक्षीं राधां प्रीणयित्वा संतोष्य कुंजशय्यां वनगृहशयनं गतवति प्राप्ते सति कीदृशे केशवे कृतवेशे कृतस्य वेषो येन तं राधां कीदृशीं रचिता कृता रुचिरा मनोहरा भूषालंकारा यया

॥३०॥

शाश्रीति हे शशिमुखि चन्द्रवदने नवभंगुरभ्रूयत्र भ्रूलता भाति शोभते युवजनमोहनाय करालाभीषणा कालसर्पिणिः सर्पस्त्रीव यस्याः भ्रुवः उदितउत्पन्नं यद्भयं तत्र भंजनाय नाशाय यूनां तरुणानां तवाधरसीधुर्मधुपानं देवसुधापानं साम्यान्माधुर्याच्च स्मरय सिद्धमंत्रः विषापहरणार्थः ॥४॥ व्यथयतीति हे तन्वि सुन्दरि नवव्यथामौनं व्यथयति माम् अर्थात् तस्मात् हे तनु शशिमधुरालापैः कामस्य चनैः पंचमं रागं प्रपंचय उद्भिरे दृष्टिभिः अवलोकनैः तापं मनःसंतापं विनोदय अपसारय हे सुमुखि विमुखीभावं त्वत्पराङ्मुखत्वं विमुंच त्यज हे मुग्धे ज्ञानशून्ये अयं प्रियः स्वयमाकारं विनैवोपस्थितः अत एव मानं वंचय कीदृशः प्रियः अतिशयस्निग्धो महाप्रेमवान्नः ॥५॥ अधुना मानिनीप्रबोधनाय प्रियः प्रपंचयति बंधूकेति हे चण्डि कोपनशीले नवायमधरो बंधूकपुष्पस्य द्युतिः कान्तिस्तस्या बांधवो मित्रं सदृशश्च

शशिमुखि तव भाति भंगुरभ्रूर्युवजनमोहककरालकालसर्पः ॥ यदुदितभयभंजनाय यूनां त्वदधरसीधुसुधैव सिद्धमंत्रः ॥४॥ व्यथयति
वृथा मौनं तन्वि प्रपंचय पंचमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः सुमुखि विमुखीभावं तावद्विमुंच न वंचय मां स्व
यमतिशयस्निग्धो मुग्धे प्रियोऽयमुपस्थितः ॥५॥ बंधूकद्युतिबांधवोऽयमधरः ॥ स्निग्धो मधूकच्छविर्गण्डश्चण्डि
चकास्ति नीलनलिनश्रीमोचनं लोचनं ॥ नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये प्रायस्त्वन्मुखसेवया वि
जयते विश्वं स पुष्पायुधः ॥५॥

कान्तिशोभनेन स्निग्धश्चिक्कणः गण्डः कपोलः चकास्ति कीदृशः बंधूकपुष्पवच्छविर्दीप्तिर्यस्य सः तथा तव लोचनं नेत्रं नीलनलिनश्रियं नीलोत्पल [illegible] नाभ्येति प्रा
प्नोति कान्तिं मोचयति त्याजयतीति च कान्तिमत् नासा नासिका तिलप्रसूनस्य तिलपुष्पस्य पुष्पायुधः कामस्त्वन्मुखसेवया विश्वं जगत्

धामेमधुरवाक् तोरन्ध्रसः प अविलोऽम्भतः अनुकूलोवरेद्वापुःप्रपालोशुभस्तवकः॥५॥ अधिगतमिति हे चण्डि कोपने इत्यापेत्ते सबोधनं हेराधे अखिलसखीभिरपत्तवेदंवपुः शरी रंरतिरणोद्युतिसंग्रामेक्षणंसन्नद्धं अधिगतंज्ञातं तवमन्यभिमानोनास्तीत्यर्थः एवंसति रणिता शब्दितारसनाक्षुद्रघंटिकासैवआरवः शब्दःडिंडिमवाद्यः प्रधानोदिंडिमोवाद्यविशेषो यस्यां क्रियायां सरसंसोत्कंठं यथास्यात्तथा अलज्जंलज्जारहितं यथातथा अभिसरकृष्णमित्यध्याहारः॥५॥ स्मरेतिहेराधे त्वंकेरलाहतेन सखीमवलंब्य सलीलं सविलासं चलगच्छ कीदृशेन केरलास्मरशरावतकामबाणवत् सुनखानिसुन्दराणि नखानियस्मिन् गतावलंबलम्य कणिते कंकणशब्दैः हरिंकृष्णमवबोधय अहमागतेतिज्ञापयेत्यर्थः अपिक्रियासमुच्चये कीदृशं हरिं निजे आत्मनि गतिर्यस्य सः निजगतिः कामतस्मिन् श्रीलंसमाधिस्थितेकाम्यंयस्य कामपरवशमित्यर्थः॥७॥ श्रीजयदेवेति श्रीजय देवेन भणितंगीतं हरौ कृष्णे विनिहितमारोपितंमनश्चित्तंयैस्तेषांमकालानांकंठतटी अविरामं सर्वदा अधितिष्ठतु आश्रयतु कीदृशं भणितं अधरीकृतः स्वयंगोर्लीचः

अधिगतमखिलसखीभिरिदं तववपुरपिरतिरणसज्जम्॥ चण्डिरणितरसनारवडिंडिममभिसरसरसमलज्जम्॥५॥ स्मरशरसुभगनखेनसखीमवलं ब्यकरेणसलीलं चलवलयक्वणितैरवबोधयहरिमपिनिजगतिशीलम्॥७॥ श्रीजयदेवभणितमधरीकृतहारमुदासितवामम्॥ हरिविनि हितमनसा [illegible] मधितिष्ठतु कंठतटीमविरामम्॥८॥ सामांद्रक्ष्यतिवक्ष्यतिप्रियकथांप्रत्यंगमालिंगनैः प्रीतिंयास्यतिरंस्यते सखिसमागम्येतिचिंता कुलः सतांपश्यति कंपते पुलकयत्यानन्दतिस्विद्यतिप्रत्युद्गच्छतिमूर्छतिस्थिरतमःपुंजेनिकुंजेप्रियः॥११॥

कृतः हारोमुक्ताहारोयेन पुनः कीदृशं उदासिता स्वगुरोलित्तिरस्कृतावामासुन्दरीपिनयधापिहारस्मरमरावकंठदे आस्थिताशोभाप्रद त्वंसंभवतितेथापि स्वयारजितांयो सांप्रदत्वं [illegible] नतुसुभ्रूकतोनत्रापितादृशपद्यवनलुसर्वंदाक्ष्यदेवभणितंतुकंठे सोकंठतेनहारापेतत्वया पिकमितिअर्थः॥८॥ इदानींसखीकृष्णस्यलेहातिश्रयमा हसामामिति हे सखि सः प्रियःकृष्णः स्थिरःनिश्चलः तमःपुंजोऽधकारसमूहोयस्मिन् निकुंजेलतागृहेमांद्रक्ष्यति ध्यानेनदृष्ट्वापि किंनियदुक्तंमधुरंवाक्यंवक्ष्यतीति इति साकंपते पुलकयतिअंगानीत्यर्थः ध्यानेनैवतयालिंगनयतिकृष्णस्यरोमांचोभवतीत्यर्थः ध्यानेनत्वसुरतके [illegible] लिपदिकृष्यावदतिमानन्दो वदिष्यति उत्कावप्रत्यंगमंगंप्रतिअवयवंप्रतिआलिंगनैः प्रीतिंतोषंयास्यति प्रियंतोसमागम्यमिलित्वास्थितेमयासहक्रीडिष्यतीतिकृष्णेसमागम्येति दूती उत्सवं

[illegible]

तन्मद्गीतेनाहं गिरिचिन्तितं हे राधिके मुग्धे मूढे अनुगतमनुकूलं मधुमथनं कृष्णमनुसर अनुगच्छ कीदृशं संप्रति इदानीं मञ्जुलो मनोहरो यो ऽशोको वेतसो वानीरस्य सीमनि पर्यन्ते नवे केलिशयनं कुञ्जे तत्रापि अनुयातं प्राप्तमित्यर्थः। अतस्त्वया शीघ्रं गन्तव्यमिति। घनेति हे घनजघनस्तनभारभरे घनयो मांसलयोर्जघनस्तनयोर्भारभरो भाराधिक्यं यस्यास्तत्संबोधनं। दरमन्थरं ईषन्मन्थरं चरणविहारः पादक्रमो यस्यां क्रियायां मुखरितः शब्दितः मणिमञ्जीरो मणिसहितो नूपुरो यस्यां क्रियायां तथा उपेहि तमुपगच्छ अतएव मराल-विकारं राजहंसविलासं विधेहि कुरु॥२॥ शृणु रमणीयतरं अतिमनोज्ञं तरुणीजनमोहनं मधुरिपोः कृष्णस्य रावं शब्दं तत्र गत्वा प्रत्यासन्ने उपविश च मिति पाठः। भ्रमरशब्दं श्रुत्वा पिकनिकरे कोकिलसमूहे कुसुम-

वसन्तरागः रूपकतालः॥विरचितचाटुवचनरचनं चरणे रचितप्रणिपातम्। संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम्॥ मुग्धे मधुमथनमनुगतमनुसर राधिके॥१॥ ध्रुवपदम्॥ घनजघनस्तनभारभरे दरमन्थरचरणविहारम्॥ मुखरितमणिमञ्जीरमुपेहि विधेहि मरालविकारम्॥२॥ शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावम्॥ कुसुमशरासनशासनवन्दिनि पिकनिकरे भज भावम्॥३॥ अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्बम्॥ प्रेरणमिव करभोरु करोति गतिं प्रति मुञ्च विलम्बम्॥४॥ स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम्॥ पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम्॥५॥

शरासनः कामस्तस्य शासनं तत्र वन्दिनि स्तावके सति भावं कृष्णेऽनुरागं भज आश्रय हे मानिनि मानं त्यक्त्वा पूर्वानुरागं भजेति कर्त्तव्यमिति कोकिला बोधयन्तीत्यर्थः॥३॥ अनिलेति हे करभोरु करिणः करभ इव जङ्घे यस्याः तत्संबोधने। करभो मणिबन्धादाकनिष्ठं करस्य बहिर्भागः करभस्तद्वदूरू यस्याः तत्संबोधने हे रम्भोरु गतिं प्रति विलम्बं मुञ्च शीघ्रं गच्छेति यावत् यतो लतानिकुरम्बं लतासमूहः अनिलेन वायुना तरलो चञ्चलः किसलयनिकरः पल्लवसमूहः स एव करस्तेन प्रेरणमिव त्वागमनविषयकं प्रेरणमिव करोति अचेतना लतापि गमनाय प्रेरयति किं पुनरहं॥४॥

कृष्णगीतगोविन्द

मंजुतरेति हे राधे रतिरभसेन सुरतोत्साहेन सहितं हास्ययुक्तं वदनं मुखं यस्यास्तत्संबुद्धिः एतादृशि त्वं मंजुतरं मनोहरं यत्कुंजतलं कुंजाभ्यन्तरदेशस्तस्मिन्केलिसदनं क्रीडागृहं तस्मिन् माधवसमीपं प्रविश आगच्छ पश्चाद्विलस क्रीडां कुरु ॥१॥ नवेति हे कुचकलशयोस्तरलो चंचलो हारो मुक्ताहारो यस्यास्तत्संबोधने हे राधे एतादृशि हे राधे माधवसमीपं प्रविश विलस च कीदृशे अशोकदलानि नूतनानि संभवंति यानि अशोकदलानि यस्मिन् तेषां शयनं तेन कृतं सारं श्रेष्ठं देशमं गृहं तस्मिन् ॥२॥ कुसुमेति हे कुसुमवत् सुकुमारो देहो यस्यास्तत्संबुद्धिः कीदृशे कुसुमचयेन पुष्पसमूहेन रचितं [illegible] तं शुचि अनुपहतं नायिकायास्तु उपभुक्तं गृहं तत्र विलस ॥३॥ चलेति हे चलितं कृतं ललितं मनोहारि गीतं यस्यास्तत्संबुद्धिः कीदृशे इह चलो मलयज पवनस्तस्य पर्वत

वरीयसः प्रतिमलनालः । मंजुतरकुंजतलकेलिसदने प्रविश राधे ॥ माधवसमीपमिह विलस रतिरभसहसितवदने ॥१॥ नवभवदशोकदलशयनसारे प्रविश राधे ॥ माधवसमीपमिह विलस कुचकलशतरलहारे ॥२॥ कुसुमचयरचितशुचिवासगेहे प्रविश राधे ॥ माधवसमीपमिह विलस [illegible] कुसुमसुकुमारदेहे ॥३॥ चलमलयवनपवनसुरभिशीते प्रविश राधे ॥ माधवसमीपमिह विलस बालेन ललितगीते ॥४॥ विततबहुवल्लिनवपल्लवघने प्रविश राधे माधवसमीपमिह विलस चिरमिलितपीनजघने ॥५॥ मधुमुदितमधुपकुलकलितरावे प्रविश राधे माधवसमीपमिह विलस मदनरससरसभावे ॥६॥ मधुरतरपिकनिकरनिनदमुखरे प्रविश राधे माधवसमीपमिह विलस दशनरुचिरुचिरशिखरे ॥७॥

लतरुरभिशं भूतं सतत्धीतं शीतलं यस्मिन् ॥४॥ विततेति हे चिरमिलिते बहुकालमन्योन्यसंबद्धे पीने मांसले जघने यस्यास्तत्संबुद्धौ कीदृशे इह विततानि लताजालानि नवपल्लवानि तैर्घनं निबिडं आसनमिति अध्याहारः निबिडासने इत्यर्थः ॥५॥ मधुरिति हे मदनरसस्य काममस्य रभस इति वेगस्तस्य सरसेन प्रादेनपक्वदाडिमबीजाभं मारीयं दशि यस्यां विभुः ॥

31

[illegible]

गमनकाले योऽयं अन्धकारस्तं दीपति अन्धतोदिन्ति हे सखि राधे ध्वान्तं सुदृशां नीपकानां संगमालिंगति कीदृशां ध्वान्तं अक्ष्णोर्नेत्रयोरंजनं कज्जलं निःक्षिपन्
विन्यस्यन् श्रवणयोः कर्णयो तापिच्छगुच्छावलीं तमालपुष्पजातकं कर्णपूरं पंक्तिं निःक्षिपन् मूर्द्धि मस्तके श्यामसरोज दामनीलकमलस्रजानिःक्षिपन्
न कुचयोः स्तनयोः कस्तूरिका पत्रकं मृगमदपत्रावलीं निःक्षिपन् कीदृशीनां सुदृशां धूर्त्तीनां परवंचकानां पुनः कीदृशीनां विश्वकं सर्वत्र निकुंजे लताग
रे अभिसारसुखरंगमनायलम्बादृशासां तासां कीदृशां ध्वान्तं नीलनिचोलवत् श्याम कंचुकवत् मनोहरं रूपमस्य तत् चारु सदृशमित्यर्थः नीलवस्त्रस्याने ध्वान्ते
गतमित्यर्थः ॥२॥ अथ कारमेव वर्णयति काश्मीरेति हे राधे एतन्ममित्रमन्धकारं जातं येन तासामभिसारिकानां यत्नं प्रवृत्तिस्तोद्दीव हेमसुवर्णं नसनिर्मुक्ते
फलतां वधनतापाधारतां तनोति विस्तारयति कीदृशं मित्रं अभिसारिकानां स्त्रीणां मंजरीभिः मणिरश्मिभिः सर्वतः आवेष्टा कृष्णोरेखापत्रकं कीदृशीनामभिसा
अक्ष्णोर्निःक्षिपदंजनं श्रवणयोस्तापिच्छगुच्छावलीं मूर्द्धि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम् ॥ धूर्त्तीनामभिसारसत्वरहृदां विष्वक्
निकुंजे सखि ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यंगमालिंगति ॥१॥ काश्मीरगौरवपुषामभिसारिकानामावद्धरेखमभितो रुचिमंजरीभिः
एतत्तमालदलनीलतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ॥३॥ हारावलीतरलकांचनकांचिदाममंजीरकंकण
मणिद्युतिदीपितस्य द्वारे निकुंजनिलयस्य हरिं निरीक्ष्य व्रीडावतीमथ सखी निजगाद राधाम् ॥४॥
रिकानां काश्मीरकुंकुमं तद्वद्गौरं पीतं वपुर्यासां पुनः कीदृशं तमिस्रं तमालदलवन्नूतनपत्रवन्नीलतमं अतिश्यामं कान्तार्थिनी यायाति संकेतं साभिसारिका इत्य
भिसारिकालक्षणं अभिसारिकानां प्रेमवतीनां समयस्त्वयमेव यत्र हृष्टमनसि गमनमिति ॥३॥ हारावलीति अथानन्तरं सखी राधां निजगाद पुनरष्टपदा च
कं प्रभूतां राधां निकुंजनिलयस्य लतागृहमेव निलयं निमन्त्रणं हृदयस्थस्य द्वारे हरिं निरीक्ष्य व्रीडावतीं लज्जावतीं अस्मिन्नवसरे निकुंजे निकुंजानि वसति नानानि

गीत
गोविन्द०

हारमिति पुनः कीदृशं विदूरमतिशयेन परिरभ्यालिंग्य उरसि हारं मुक्ताहारं धारयन्तं कीदृशं हारं अमलतरं अतिशयेन निर्मलं तारा स्थूलमुक्तास्तद्रूपं यस्य पुनः कीदृशं यमुनाजलपूरं निर्गमन्तं नाहमग्नाहमिव स्थितं कीदृशं यमुनाजलपूरं स्फुटतरेण प्रकटेन फेनकदम्बकं फेनसमूहस्तेन करं बितं मिश्रितं ॥२॥ श्यामलमिति पुनः कीदृशं श्यामलं कृष्णं मृदुलं मनोहरं कलेवरमण्डलं शरीरा वयवो हस्तादिर्यस्य अधिगतं परिहितं गौरदुकूलं पीताम्बरं येन पुनः कीदृशं नीलनलिनमिव नीलोत्पलमिव स्थितं कीदृशं नीलनलिनं पीतपरागाणां गौरकुसुमरेणूनां पटलभरस्य समूहाति शयस्तेन वलयितं वेष्टितं मूलं यस्य ॥३॥ तरलेति पुनः कीदृशं तरलस्य चंचलस्य दृगंचलस्य चलनेन मनोहरं यद्वदनं मुखं तेन जनितउत्पादितो रतौ रागः प्रीतिर्येन पुनः कीदृशं शारदि शरत् काले विकसितं पद्मं तडागमिव स्थितं कीदृशं तडागं स्फुटं विकसितं यत् कमलं तस्योदरे मध्ये खेलितं क्रीडितं खंजनयुगं यत्र किन्न शारदिखंजरीटः पक्षिखेलनं तत्र राकुनदर्श नेन कुलानन्दप्राप्त्यादि प्रपंचः ॥४॥ वदनेति पुनः कथंभूतं कमलस्य परिशीलनाय प्रकाशनाय मिलिते ये मिहिर समे सूर्यसमे सूर्यसदृशे कुण्डले ताभ्यां शोभा यस्य पुनः स्मितरुच्या

||३७|| हारममलतरतारमुरसि दधतं परिरभ्य विदूरम्। स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम् ॥२॥ श्यामलमृदुलकलेवरमण्डलमधिगतगौ रदुकूलम्। नीलनलिनमिव पीतपरागपटलभरवलयितमूलम् ॥३॥ तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागम्। स्फुटकम लोदरखेलितखञ्जनयुगमिव शारदितडागम् ॥४॥ वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभम्। स्मितरुचिरुचिर समुल्लसिताधरपल्लवकृतरतिलोभम् ॥५॥ शशिकिरणच्छुरितोदरजलधरसुन्दरकुसुमसुकेशम्। तिमिरोदितविधुमण्डलनिर्म लमलयजतिलकनिवेशम् ॥६॥ विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरम्। मणिगणकिरणसमूहसमुज्ज्वलभूषण सुभगशरीरम् ॥७॥

रुचिरा समुल्लसिता विकसिता अधरपल्लवा येन पल्लवेन कृतो राधायाः रतिलोभः सुरतेच्छा येन पुनः कीदृशं शशिकिरणेन चन्द्रप्रकाशेन छुरितं व्याप्तं उदरं मध्यं यस्य जलधरस्य तत्सदृशं सुन्दरकुसुमैः सुपुष्पैः सुकेशं यस्य तं पुनः कीदृशं तिमिरोदितं चन्द्रबिम्बं तद्वन्निर्मलं मलयजतिलकं निवेशं यस्य तं

32

विहिते निजे मुरारेः कृस बं जयदेव कविराजे मेंगलसद्मा निकुरुकी ईद्दशा कविराजे विहितः कृतः पद्मावत्याः स्त्रियः सुखस्य समाजः समूहो यस्मिन् सुखसमाज इति पाठः सुखस्य समाजः सानिध्य
येन तस्मिन् एतेन स्वनापि कापि मिदं प्रेमाति धावो दर्शितः नत्वन्पस्या पुनः कीदृशे भणति नवगुरुणानरत्व इति कश्चित् अविदधराधा माधव समीप मिह भण्णनो ति पाठः ॥८॥ त्वां मिति
राधे श्रयं कृष्णस्त्वं वसुधराम तेन संबाधं गहनं विंबाधरं पातुमिच्छति कीदृशः कृस्णः पनः स्विते न मनसा त्वां चिरं वहन् अतिश्रान्तः पनः कन्दर्पेण अभिताप
तः अन्योपि भारवाही सूर्यतापितः जलानि पातुमिच्छति तद्वदित्यर्थः तत्तस्माद्दस्य कृष्णस्यांकं क्रोडं सरांमुहूर्तमात्रं अलंकुरु भूषय तत्समीपं गत्तुं बिभेमीत्यत आह कृष्णे
समागमे भयकृत्तः कीदृशो दासवत् सेवकत्वं ईप्सितं मन कीदृशो भूतेप कृतसन्तेपः त्वं लक्ष्मीः स्वपत्नी तेन न कीतेन तन क्रीते दासोऽतिमीनो भवतीति भावः अतएवोपसेवि
तं पदांभोजं चरणकमलं येन ॥७॥ सा ससाध्वसेति श्रीराधा सन्निकर्षादति नेत्रध्यानात् गोविन्दे कृष्णे लोललोचना कीदृशी राधा ससाध्वसानन्दं सरतिविदग्धः कृष्णः कथमपार जनीपरीतस्मा
विहितपद्मावतीसुखसमाजे प्रवि... राधे माधवसमीपमिह भणति जयदेव कविराजे ॥८॥ त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः कन्दर्पेण च पातुमिच्छ
ति सुधासंबाधबिम्बाधरं अस्यांकं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दास इवोपसेवितपदांभोजे कुतः संभ्रमः ॥१॥ सा ससाध्वससानन्दं गोविन्दे लोललो
चना सिंजाना मंजु मंजीरं प्रविवेश निवेशनम् ॥ [वराडीरागः रूपकतालः ॥] राधावदनविलोकनविकसितविविधविकारविभंगं ॥ जलनिधिमिव विधुमंड
लदर्शनतरलितनुंगतरंगम् ॥१॥ हरिमेकरसं चिरमभिलषितविलासम् ॥ सा ददर्श गुरुहर्षवशंवदवदनमनंगनिवासम् ध्रुवपदम् ॥
पेनानन्दं सहर्ष चरति नेत्र ध्यानात् गोविन्दे कृष्णे लोललोचना ... नाचंचलनयना सेवक्त ताम् पुनः कीदृशी मंजु मनोहरं शब्दयुक्तं मंजीरं नूपुरं सिं ... जोनागमनवशात् सारंकुर्वती
कचित् साध्वसं सानन्दं गोविन्द इति पाठः तत्र साध्वसः पूर्वापरात् सानन्दो राधाया आगमनात् ॥१॥ राधेति सा राधा एवंभूतं हरिं ददर्श सप्तपद्यां संबन्धः हरिं विशेषयानि कीदृशं
राधावदनविलोकनेन विकसितः प्रकाशितो विविधो नानाप्रकारः भंगः कनकादिरचनाये न पुनः कीदृशं जलनिधिमिव समुद्रमिव स्थितं कीदृशं ... निधिं विधुमं

जयोति भुजो जितः श्रीकृष्णस्य भुजदण्डो दण्डाकारो बाहुर्जयति सर्वोत्कर्षेण वर्तते दंष्ट्राद्रे नाज्ञान [illegible] निर्तं कीदृशो भुजदण्डः प्रकीर्णासृग्विन्दुः प्रकीर्णो विकीर्णो असृग्बिन्दु यस्मिन् [illegible]
दुरेण द्विपरणमुदा कुव[illegible]लयापीडमारणा तोषेण स्वयं सिन्दूरेण मुद्रितः चिन्हित इव द्विपस्येति सिन्दूरेण मुद्रित स्तोहि मदीयो बाहुरपि सिन्दूरमुद्रितो भवतु पुनः
कीदृशो जयश्रिया जयलक्ष्म्या विन्यस्तै र्विन्यस्तै र्मन्दारकुसुमैः पारिजातपुष्पै र्महित इव पूजित इव [illegible] पुष्पवृष्टि [illegible] चिनु कीदृ[illegible] प्रास्य मुरजितः भुजो
पीडस्य भुजदण्डस्य क्रीडया हतः कुवलयापीड नामा करी हस्ती [illegible]ेन॥३॥ मानन्दोरु सस्वासमागमेन ॥ इति श्रीगीतगोविन्दटीकायां पदद्योतनिकायां एकादशः सर्गः॥११॥
गतवती ति अथ हरिः कृष्णः प्रियां वल्लभां राधां सरसमनसं रसोनुरागस्तत्सहितं मनो यस्यास्तां दृष्ट्वोवाच वक्ष्यमाणामिति शेषः कस्मिन्सति सखीवृन्दे स

जयश्रीविन्यस्तै र्महित इव मन्दारकुसुमैः स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव॥ भुजापीडक्रीडाहतकुवलयापीडकरिणः प्रकीर्णासृ
ग्विन्दुर्जयति भुजदण्डो मुरजितः॥३॥ इति श्रीगीतगोविन्दे राधिकामिलने नाम एकादशः सर्गः॥११॥ गतवति सखीवृन्देऽम
न्दत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधरां॥ सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लवप्रसरशयने निक्षिप्ताक्षी
मुवाच हरिः प्रियाम्॥१॥ विभासरागे रूपकताले॥ किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम्॥ नवपदपल्लववैरिप
राभवमिदमनुभवतु सुवेशम्॥१॥

वृन्दे सखीसमूहे गतवति सति अथ यानेषु सति कीदृशीं राधां मन्दो[illegible]ौ यस्यास्त्रपा लज्जाभरस्तेन निर्भरो [illegible] स्मरवशात् [illegible] परवशात्त्वदाय आकूत अभिप्रायस्तेन स्फीतं
[illegible] तस्मिन् तेन [illegible] स्नपितो व्याप्तावधरो यस्यास्तां अपमन्दः [illegible] विशेष [illegible] पुनः कीदृशीं राधां मुहुः वारंवारं नवपल्लवप्रसरशयने नवपल्लवरचित
शयने निक्षिप्ताक्षीं निहितनयनां शय्या [illegible]॥१॥ [illegible] सौख्यं [illegible] पादस्येने पस्याद् [illegible] पातः पार्श्वं

॥३५॥

33

श्रीजयदेवेति श्री जयदेवभणितविभवद्विगुणीकृतो भूषणभारो ऽलंकारसमूहो येन तं जयदेवसरस्वती स्वयमेवोपमालंकारादि अलंकारवती भगवद्गुणोत्कीर्तनेनापि सुतरामलंकृतेति
भावः एवंभूतं हरिं श्रीकृष्णं सुचिरं हृदि निधाय प्रणमतेति भक्तान्प्रत्युक्तिः कीदृशं हरिं भवजलभवाब्धौ पततां कृतं पुण्यं पतस्योदयपत्तेन सारः हरिस्तु सुकृतोदये
न प्राप्यते इत्यतो विचित्य पातु ॥८॥ एवंभूतस्य कृष्णस्य स्पर्शनादिद्वारा यात्तदानीं किं जातं तदाह अतिक्रम्येति इदानीं प्रियतमसमालोकसमये कृष्णावलोकनकाले
अत्यर्थं नेत्रयोः स्वेदाम्बुप्रसन इव धर्मजलमिव धर्मजलप्रवाहसदृशः राधायाः हर्षाश्रुनिकरः सात्विकभावेन नेत्राम्बुपूरः पपात तत्र नेत्रे अपांगेन अपान्तेन
निक्रम्य श्रवणापथस्य कर्णमार्गस्य पर्यन्तगमनं परिसरगमनं तेन यः प्रयासस्तेन वा अक्ष्णोर्नेत्रयो स्वेदाम्बुप्रसर अभूत् कीदृशयोः अक्ष्णोः तरलतरतारं

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम् । प्रणमत हृदि विनिधाय हरिं भयजलसुकृतोदयसारम् ॥ अतिक्रम्यापांगं श्रवणपथ
पर्यन्तगमनं ॥ प्रयासेनेवाक्ष्णोस्तरलतरतारं पतितयोः ॥ इदानीं राधाया प्रियतमसमालोकसमये पपात स्वेदाम्बु प्रसर इव हर्षाश्रुनिकरः ॥१॥
भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहितस्मितं याते गेहाद्बहिरवहितालीपरिजने प्रियास्यं पश्यन्त्याः स्मरपरवशाकूतसुभगं सलज्जा लज्जा
पि व्यगमदतिदूरं मृगदृशः ॥२॥

रं चंचलाति कनीकं यथा स्यात्तथा पतितयोः कृष्णं प्रति गतयोः अत्यन्तस्यापांगगमनेन श्रमो भवति तेन पततीति द्युत ॥१॥ भजन्त्या इति मृगदृशो मृगाक्ष्याः राधाया अवहिते
सावधाने आलीपरिजने सखीसेवक वर्गे गेहाद्बहिर्याते सति तल्पान्तं शय्यापर्यन्तं भजन्त्याः प्राप्नुवन्त्याः कीदृशोपरिजने कृतं कपटेन कण्डूति करणं कर्णादिकण्डूयनं तेन विहितं
हास्यं येन पुनः कीदृश्याः प्रियास्यं कृष्णमुखं पश्यन्त्याः कीदृशं प्रियास्यं स्मरवशं कामवशाधीनं आकूतं तु रनाभिप्रायस्तेन सुभगं मनोहरं काम विकारं रसभावादि
मनोहरमित्यर्थः पुनः कीदृश्याः सलज्जायाः लज्जासहितायास्तस्याः स्वेच्छां दृष्ट्वा वचनमनंगत्वा एकाक्षरोहिता सखीनां सावधानत्वं सर्वाः सख्यो गता इति मया कथमत्र
स्थातव्यमिति लज्जापि गतेति भावः ॥२॥

गीतगोविंद

[illegible]

शशीति हे शशिमुखि चन्द्रवदने मणिरसनागुणं कांचीदाम मुखरय शब्दं कारय कीदृशं अनुगुणः सदृशः कंठनिनादो यस्य कंठनादसदृशमित्यर्थः त्वं मम श्रुतियुगले कर्णे युग्मे चिरात्तव विरहेन यो ऽवसादः खेदस्तं खेदं कारयामास कीदृशे ऽपि करुतैः कोकिलशब्दैर्विकले दुःखिते ॥१॥ मामिति हे राधे तव इदं नयनं नेत्रं मम अधुना मा अवलोकितुं इच्छु नेत्रं मीलितमिव मिलति अपि च तव कीदृशं मां अतिविफल रुषा अति[illegible] निःफलकोपेन विकलीकृतं दुःखितं नयनं विशेषं रां वा विकलीकृतं कोपान्तरं प्रापित अत एव निःफलरोषात् हे सखि विरमात् भवरति खेदं क्रीडाखेदं त्वं विसृज त्यज ॥७॥ श्रीजयदेवेति श्रीजयदेव भणितमिदं गीतं रसिकजनेषु मनोरमं मनः प्रीतिकरं रतिः संभोगः रसः शृंगारः भावाः संचारिणः सात्विकादयस्तेषां विनोदं कौतुकं जनयतु उत्पादयतु कीदृशं इदं अनुपदं पदे पदे निगदितं उक्तं मधुरिपोः मोदो हर्षो यत्र

अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासम्। त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम्॥५॥ शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठनिनादम्॥ मम श्रुतियुगले पिकरुतविकले शमय चिरादवसादम्॥६॥ माममतिविफलरुषा विकलीकृतमवलोकितुमधुनेदम्। मीलितलज्जितमिव नयनं तव विरम [illegible] रतिखेदम् ॥७॥ श्रीजयदेवकवेरिदमनुपदनिगदितमधुरिपुमोदम्। जनयतु रसिकजनेषु मनोहरतिरसभावविनोदम् ॥८॥ प्रत्यूहः पुलकांकुरेण निविडाश्लेषे निमेषेण च क्रीडाकूतविलोकिते ऽधरसुधापाने कथाकेलिभिः॥ आनन्दाधिगमेन मन्मथकलायुद्धे ऽपि यस्मिन्नभूदुद्भूतः स तयोर्बभूव सुरतारंभः प्रियंभावुकः ॥९॥

गीतं ॥२३॥ प्रत्यूह इति तयोः राधाकृष्णयोः सः सुरतारंभः प्रियं भावितुं शीलं यस्य स उद्भूतः प्रकटो बभूव सकः यस्मिन् सुरतारंभे निविडाश्लेषे गाढालिंगने कृते पुलकांकुरेण रोमांचेन प्रत्यूहो विघ्नो ऽभूत् अवधान [illegible] यस्मिन् सुरतारंभे क्रीडाकूतविलोकिते [illegible] पूर्वकं यद्विलोकितं तस्मिन् नेत्रे निमेषो

॥३५॥

३९

राधिके अधुनाऽऽस्मिन् क्षणे अनुगतमधीनं नारायणं मामनुसर अनुगच्छ अनुसरणप्रकारमाह। हे कामिनि निःशङ्कितं किसलयैः रचितशयने शय्यायां भागं चरणौ निवेशय पादपद्मार्पणं कुरु इदं किसलयशयनं त्वत्पादस्पर्शनवशेन तत्तस्मात्पराभवन्तीत्याकारं मनुभवतु सम्पतु त्वत्पादपल्लवस्य कीर्तिहरणात् राधे नखकेहि चरणौ शयने कीदृशं इदं मृदुवेशामपि परस्पर्शनादिना लक्षणमपि॥१॥ करोति हे राधे अहं करकमलेन ते चरणौ पादं करोमि संवाहयामि धानूना मनेश्रान्ते त्वं विदूरं मां गमितासि दूरागतस्य चरणसंवाहनमुचितम्॥ त्वं शयनोपरि क्षणं नूपुरमुपकुरु मामिव अनुगमन शूरं तथा अनुसरणे शूरं मामिव पथा श्रीलिंगनादिना मामुपकरोषि तथा नूपुरमप्यालम्बन ऊर्ध्वे इति भावः॥२॥ वदनेति। त्वमनुकूलवचनं धाष्ट्र्यमम

क्षणमधुना नारायणमनुगतमनुसर राधिके।ध्रुवपदम्॥ करकमलेन करोमि चरणमहमागमितासि विदूरम्॥ क्षण
मुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम्॥२॥ वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम्॥ वि
रहमिवापनयामि पयोधररोधकमुरसि दुकूलम्॥३॥ प्रियपरिरंभणरभसवलितमिव पुलकितमतिदुरापम्॥ मदुरसि
कुचकलशं विनिवेशय शोषय मनसिजतापम्॥४॥

तमिव रचय वदनकीदृशं वदनमेव सुधानिधिश्चन्द्रस्तस्माद्गलितमुत्पन्नम् मुरसि वक्षसि वर्त्तमानं दुकूलं पयोधरं विरहमिव वियोगमिवापनयामि स्फोटयामि यतः पयोधररोधकं स्तनाच्छादकं विरहपक्षे स्तनाभ्लेषप्रतिबन्धकं॥३॥ प्रियेति त्वं मदुरसि मम वक्षसि कुचकलशौ विनिवेशय स्थापय तेन मनसिजतापं कामपीडां नाशय शोषय त्वं कीदृशं परिरंभणाल्लिङ्गनात्परभसेनोत्साहेन वलितमिव संभृतमिव पुनः कीदृशं अतिदुःखेनावाप्यमतिदुरापं दासस्य वक्षं मां प्रतिमिव अधरसुधारसस्याभावात् २

धा२

तस्याः कृतिभिः पूर्वोक्तैः कामशरैर्यत्पत्युः स्वामिनो मनः कीलितं विद्धं तदद्भुतमाश्चर्यं किंभूतैः कामशरैः प्रान्तप्रान्तः कालेऽशोणैर्नयनैर्निखातैरारोपितैः इतीति
किं तस्या राधाया उरः पाटलपाणिजैः नखैरक्तैः नखैरंकितं चिह्नितं तस्या निद्राकषाये निद्रालोहिते दृशौ नेत्रे तस्या निर्धूतः पीतः अधरशोणिमा अधरलौ
हित्यं तस्या विलुलिता म्लाना स्रस्ताः शिथिलाः स्रजो माला येषु ते मूर्द्धजाः केशाः दर ईषत् श्लथं शिथिलं अंचलं यस्य एतादृशी कांचीदाम मेख
लागुणः नखक्षतैः जागराच्चुम्बनकेशाकर्षणनीवीमोचनानि पंचशरत्वेन निरूपितानि अन्यच्च निखातैर्वारोपैरन्यत्कीलितमित्यादि स्वयमित्यर्थः ॥४

त्वामप्राप्येति हरिः हृष्टो युष्मान् पातु कीदृशो हरिः राधायाः स्तनकोरकोपरि स्तनमुकुलोपरि चलन्ती संचरंती नेत्रे यस्य किं कृत्वा वामांच
तस्याः पाटलपाणिजांकितमुरो निद्राकषाये दृशौ निर्धूतोऽधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः । कांचीदाम दरश्लथांचलमिति प्रातर्निखातैर्दृशो-
रेभिः कामशरैस्तदद्भुतमहो पत्युर्मनः कीलितम् ॥४॥ त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे शंके सुन्दरि कालकूटमपिबन्मूढो मृ-
डानीपतिः ॥ इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्य वामांचलं राधायाः स्तनकोरकोपरि चलन्नेत्रो हरिः पातु वः ॥५॥

लं हृदयवामदेशाच्छादनं वसनं विक्षिप्य दूरीकृत्य कीदृश्याः राधायाः इत्थं इति पूर्वकथाभिरन्यमनसः कथासक्तचित्ताया इत्यर्थः कथामेवाह हे सुन्दरि क्षीरोदतीरोदरे क्षी
रसमुद्रतीरमध्ये मृडानीपतिर्महादेवः त्वामप्राप्य कालकूटं विषमपिबत् इत्यहं शंके तर्कयामि यतो मूढो ज्ञानरहितः कीदृशीं त्वां मयि मल्लिमित्ते निमि
त्ते स्वयंवरपरां मदेकपतिकामामित्यर्थः इत्थं पूर्वकथा अनेन गौरीपतिर्विलेपितवान् भान् विषमपिवदिति गोप्या अपि लम्मधिगुरोनिभाव ॥

॥५॥

दोर्भ्यां मिति कान्तः क्रोधः कामस्य निर्वचनीयोऽत्र [illegible] ट्टिं संतो प्रमापकोटम्रा. क्रमः दोर्भ्यां बाहुभ्यां संयमितो बद्धः पुनः कीदृशः पयोधरभरेणास्तनभारेणापीडितः पारि
जैनरवैराविद्धः स्वच्छितः ध्यानैर्दूनैः तत्र अधरस्पृष्टेपस्यः श्रोणीतटेन कटिप्रदेशेनाहतस्ताडितः कचेकेशावंधे हस्तेनानमितो [illegible] नम्रीकृतः अधरमधुस्यन्दन
श्री छाम्रतद्रवेण संमोहितः एवंभूतोपि तृप्तिमाप अहो आश्चर्यं कामस्य गतिः स्थितिर्वा माविपरीता अस्मिन् श्लोके विपरीतसुरतं द्योतितं ॥५॥ मा
रांके सुतन्तपाराधया कान्तजयापहं स्मजयं कर्तुं मारस्य कामस्य चिन्हं यस्मिन् कामचिन्हे रतिकेलिः सुरतक्रीडा चुम्बनादि तत्र यासं कुलो व्याप्तो पीरणाः सं

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः हस्तेनानमितः कचेऽधरमधु
स्यन्देन संमोहितः कान्तः काममपि तृप्तिमापत्नहो कामस्य वामा गतिः ॥५॥ मारांके रतिकेलिसंकुलरणारंभे तया साहसप्रायं
कान्तजयाय किंचिदुपरि प्रारंभि यत्संभ्रमात् निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कंपितं वक्षो मीलितमक्षिपौ
रुषरसः स्त्रीणां कुतः सिध्यति ॥६॥

नामजस्यारंभे उपक्रमे कामयुद्धारंभे इत्यर्थः साहसप्रायं साहसबहुलं यत्किंचिदुपरि [illegible] सोपरि संभ्रमादेशात् आरंभि आरब्धं तत्र जघनस्थ
ली निष्पन्दा निश्चला अभूत् दोर्वल्लिः बाहुलता शिथिलिता अभूत् वक्ष उत्कंपितं अभूत् अक्षि चक्षुर्मीलितं मुद्रितमभूत् अतः स्त्रीणां
पौरुषरसः पराक्रमाभिलाषः कुतः कथं सिध्यति न सिध्यत्येवेत्यर्थः संग्रामपक्षे मारो मरणामं के चिन्हं यस्मिन् विपरीतसुरतं चैव
र्णितमत्र ॥६॥

अथेति अथानन्तरं राधासुरतान्ते आनन्देन गोविन्दं कृष्णं इदं वक्ष्यमाणोक्तं सादरं जगाद कीदृशी सहसा ईषद्धास्यपूर्वका कीदृशं गोविन्दं संतुष्टं पुनः कीदृशी नितान्तमति शयेन खिन्नं खेदयुक्तमंगं यस्याः ॥८॥ तदेवाह कुर्वित्ति अत्र स्वाधीनभर्तृकावर्णनीया लक्षणान्तरम् । कराहतेन वचनेन चरणेन च पाणिना कन्दुकेनैव कान्तेन क्रीडेत्स्वाधीनभर्तृका रागस्तत्रत्यं पूर्वोक्तमेवास्ति प्रथमसर्गे हे यदुनन्दने चित्तहर्षके यदुनन्दने कृष्णे कीदृ
इति सति सा राधा निजगाद कं नीं किं निजगादेत्यत आह हे यदुनन्दन कृष्ण त्वं मम अत्रास्मिन्पयोधरे स्तने करेण स्वहस्तेन मृगमदपत्र

॥८१॥

36

अथ सहसा प्रीत सुरतान्ते नितान्तखिन्नांगी राधा जगाद सादरमिदमानन्देन गोविन्दम् ॥ रामकरीरागः रूपकतालः ॥ कुरु यदुनन्दन चन्दनशिशिरतरेण करेण पयोधरे ॥ मृगमदपत्रकमत्र मनोभवमंगलकलशसहोदरे ॥१॥ निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने । ध्रुवपदम् ॥ अलिकुलगंजनमञ्जनकं रतिनायकसायकमोचने त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय लोचने ॥२॥

कं कस्तूरिकापत्रावलीं कुरु कीदृशेन करेण चन्दनवच्छिशिरतरेणातिशीतलेन कीदृशे पयोधरे मनोभवस्य कामस्य मंगलार्थं कलशः पूर्णकुंभस्तस्य सहोदरे तुल्ये ... मन्हि रत्यमिति ॥१॥ अलीति हे प्रिय कृष्ण त्वं लोचने मदीये नेत्रे त्वदधरचुम्बनेन त्वदधरचुम्बनेन त्वदधरकृतचुम्बनेन लम्बितं गलितं अधःस्तनं कज्जलमुज्ज्वलय पुनर्दीपय कीदृशं कज्जलं अलिकुलस्य भ्रमरसमूहस्य गंजनं अभिभवं संजनयतीति ॥ संजनकं विघापकं कीदृशे लोचने रतिनायकस्य कामस्य सायकान् मोचयति ... मार्गान् मुंचतीत्यर्थः ॥२॥

व्यालोलयति केशपाशान्तर्पितत्वादपि धिनोति अर्थात् कस्मात् कीदृशी विलुलितां म्लानां स्रजं धारयन्तीति आत्मरूपमेवाह केशपाशो व्यालोलः इतस्ततो विदि
शोऽभूत् अलके स्वेदसिक्ते कुन्तलेऽप्लाविलितं स्यात् नाद्यसितं कपोलो स्वेदेन घर्मजलेन लोलौ व्याप्तौ दष्टाधरश्रीः खण्डिताधरलक्ष्मीः स्वच्छाय
का कुचकलशभागुच्चाम्लानत्वं दृष्टो हारयष्टिः मुक्ताकलापः हरितादूरीकृता काञ्चीरसना कां चिरात् प्राप्तसङ्गता वलिता यद्यपीति
सर्वं योजनीयम् ॥८॥ ईषदिति धन्यो जनः कुरङ्गीदृशो हरिणनयना या आननं मुखं धयतीति कीदृश्याः कुरङ्गीदृशः श्वासेन कामजनितेनोन्न

व्यालोलः केशपाशो तरलितमलकैः स्वेदलोलौ कपोलौ स्पष्टा दष्टाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः। काञ्चीकाचि
द्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यन्ती चात्मरूपं तदपि विलुलितस्रग्धरेयं धिनोति ॥८॥ ईषन्मीलितदृष्टिमु
ग्धहसितं सीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरम्। श्वासोत्कम्पपयोधरोपरिपरिष्वङ्गात्कुर
ङ्गीदृशो हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननम् ॥९॥

ङ्गो किंचिन्मीलितौ पयोधरौ स्तनौ तयोरुपरिपरिष्वङ्गात् यो हर्षो हर्षाधिक्यं तेन विमुक्ता त्यक्ता [illegible] अतएव निःसहा कार्श्या तनुर्यस्याः सा
अथ वा अप्रसङ्गोऽपि पञ्चमीपरिष्वङ्गात्कृत्वा आलिङ्ग्य धन्योऽधरं पिबतीति भावः कीदृशमाननं ईषन्मीलितदृष्टिं मुकुलितनयनं मुग्धं सु
न्दरं हसितं हास्यं यस्मिन् तत् पुनः कीदृशं सीत्कारधारावशात् कामरिकास्वरपरम्परावशात् अव्यक्ता [illegible] केलिः तस्यां या काकुः शोक

मभेति हे मानद मानखण्डन मानच्छेदक कौ वा मम रुचिरे सुन्दरे चिकुरे केशे कुसुमानि पुष्पाणि कुरु रचयेत्यर्थः कीदृशे चिकुरे मानसजस्य कामस्य ध्वजचामरतुल्ये पुनः कीदृशे रतिगलिते सुरतसमये मुक्तबंधने ललिते श्रंगारचेष्टया युक्ते पुनः कीदृशे शिखण्डिशिखण्डक स्येव मयूरपिच्छस्येव डामर आटोपो यस्य आटोप आडम्बरमिति यावत् ॥६॥ सरसेति हे शुभाशय महोदारचित्त त्वं मम सुन्दरे जघने मणिरसना मुक्तरसनानुरूपं ... वसनानि वस्त्रा

मम रुचिरे चिकुरे कुरु मानद मानसज ध्वजचामरे ॥ रतिगलिते ललिते कुसुमानि शिखण्डि शिखण्डकडामरे ॥६॥ सरसघने जघने मम शंबरदारणवारणकन्दरे ॥ मणिरसनावसनाभरणानि शुभाशय वासय सुन्दरे ॥७॥ श्रीजयदेववचसि जयदेव हृदयं सदयं कुरु मण्डने ॥ हरिचरणस्मरणामृतमनुभवकृतकलुषज्वरखण्डने ॥८॥

णि आभरणानि वासय परिधानं कारय कीदृशे जघने सरसः कामजनको घनो निबिडश्च पश्चात्कर्मधारयः। पुनः कीदृशे शंबरदारणः कामः स एव वारणः कुंजरस्तस्य कन्दरे वासस्थाने ॥७॥ श्रीजयदेवेति हे भक्तजन त्वं मण्डने अलंकारभूते शुभदे कल्याणप्रदे श्रीजयदेववचसि गीतरूपे हृदयं मनः सदयं सानुकंपं तत्परं कुर्वित्यर्थः कीदृशे वचसि हरिचरणस्मरणामृते न कृतं कलिकलुषज्वरस्य कलिकृतपापरूपज्वरस्य खण्डनं नाशो येन ॥८॥

37

नयनेति हे शुभवेष शुचिरालंकारवेषक स्वलं मम श्रुतिमण्डले कर्णसंप्रदेशे कुण्डले निवेशय पङ्क्तयस्त्वग्रमंपथास्यानं स्थापय कीदृशे श्रुतिमण्डले नयनकु-
रङ्गस्य नेत्रमृगस्य तरंगविकाशस्य उत्फालगमनस्य निरासं निषेधं करोतीति पुनः कीदृशौ मनसिजपाशौ कामपाशतुल्यस्य बिलासमादिरूपवी-
... पाशाः पथगमन निरोधको भवतीति ॥३॥ भ्रमरेति हे कृष्ण मम सन्मुखे सुदरे मुखे अलकंके पापाशं परिकमेषु प्रसाधय मण्डपेत्यर्थः कीदृशामूलके
उपरि मुखोपरि सुचिरं बहुकालं व्याप्य सुचिरं भ्रमरसमूहं रचयन्तं कारयन्तं घनजातीयवर्णा भ्रमरा यत्र पतन्तीति भावः पद्मामुखं कमलस्यानीयं

नयनकुरंगतरंगविकाशनिरासकरे श्रुतिमण्डले। मनसिजपाशविलासधरे शुभवेष निवेशय कुण्डले ॥ भ्रमरचयं रचयन्त-
मुपरि रुचिरं सुचिरं मम सन्मुखे। जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ॥६॥ मृगमदरसवलितं ललितं कुरु ति-
लकमलिकरजनीकरे। विहितकलंकविमल कमलानन विश्रमितश्रमसीकरे ॥७॥

मयि भ्रमरा तिष्ठन्ति तद्वत् कीदृशे मुखे जितं कमलं येन तत्र विमले निर्मले कीदृशमलकं नर्मजनकं शोभाकारकम् ॥६॥ मृगेति कमलानन हे कृष्ण अलिकर-
जनीकरे ललाटचन्द्रे तिलकं कुरु कीदृशं तिलकं मृगमदरसे न वलितं निर्मितं अत एव ललितं मनोहरं पुनः कीदृशं विहिता कृता कलंकस्य कला
येनाऽसौ भागो यत्र अपवाद [illegible] द्वितीया चन्द्रप्रायं तिलकं कुर्वित्यर्थः किं भूते अलिकरजनीकरे विश्रमिता उपशान्ताः श्रमसीकराः
प्रयासजलकणा यत्र एतेन चन्द्रोऽपि [illegible] इति ॥७॥

गी॰गो॰ १२०

पद्यं यदीति जयदेवपण्डितकवेः गांधर्वकलासु गानविधासु कौशलं पटुत्वं प्रावीण्यमित्यर्थः अस्ति अस्य व्याहारः यदि हरिस्मरणे मनुष्याणां अनुरागचिन्तनं ... तु शृंगारस्य शृंगाररसस्य ... यो विवेकः संभोगविप्रलंभादिरूपः तादृशविवेकं विवेचनं तस्यतत्त्वमर्थं ज्ञानं तस्य रचना कौतिरस्तीति चन्द्रालोकेषु फ

यदि गांधर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं यच्छृंगारविवेकतत्त्वरचना काव्येषु लीलायितम् ॥२॥
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः ॥ सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः ॥३॥

॥४८॥ विकर्मसुली पितृविजसितमसि जयदेवपरि...तकवेस्तत्सर्वं श्रीगीतगोविन्दतो गीतगोविन्दग्रन्थात् सुधियः पण्डिताः सानन्दाः आनन्दयुक्ताः संतः परि
शोधयन्तु विवेकेन विचारयन्तु ... इत्यर्थः कीदृशस्य जयदेवपण्डितकवेः कृष्णे हरावेकतानस्तत्पर आत्मा मनो यस्य ॥३॥

38

॥२॥

स्थापेति नूपुरारावाणा निगदित एको प्रीतः संतुष्टो पीतांबरो ऽपि कौस्तुभो पि तथाऽकरोत् यथा तपोक्तं तथाऽकरोत् इतीति किं हेतो स्तनयुगकुचयोः स्तनयोः पत्र चित्रविशेषकं रचय कपोलयोः पत्रावलीं कुरुष्व जघने कांचीं तु रुन्धि कांचीं प्रयुङ्क्ष्व अर्प्पय स्रजा पुष्पमालया कवरीभरं केशपाशं अंगं च पूजय यं बंध नं कुरु इत्यर्थः हस्ते वलयश्रेणीं कंकणपंक्तिं कलय स्थापय पदे चरणयोर्नूपुरौ कुरु स्थापयेति रागिणो जनस्य संनिधौ प्रार्थनेन तन्मूलको दोषः॥१॥

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोर्घटय जघने कांचीमंच स्रजा कवरीभरं कलय वलयश्रेणीं पाणौ पदे कुरु नूपुराविति निगदितः प्रीतः पीताम्बरोऽपि तथाऽकरोत्॥१॥ पर्य्यंकीकृतनागनायकफणाश्रेणीमणीनां गणे संक्रान्तं प्रतिबिंबसंवलनया बिभ्रद्वपुर्विक्रियां पादांभोरुह धारिवारिधिसुतामक्ष्णां दिदृक्षुः शनैः कायव्यूह मिवाचरन्नुपचितोकूतो हरिः पातु वः॥२॥

पर्य्यंकीकृतेति उपचितं समद्ध आकूतं कामभारो यस्य स हरिः कृष्णो वो युष्मान् पातु रक्षतु कीदृशो हरिः वपुर्विक्रियां देहप्रक्रियां शरीरपरंपरामित्यर्थः बिभ्रत् धारयन् किं कुर्वन् पर्य्यंकीकृतः शय्यास्थानीकृतो यो नागनायकः शेषनागस्य फणश्रेणी फणासमूहस्तस्य मणीनां रत्नानां गणो समूहे संक्रान्तं संवद्धं यत्प्रतिबिंबं तस्य संवलनया अन्वयेन स्थितेनेत्यर्थः कायव्यूहमिव बहुशरीरतामिवाचरन् कुर्वन् किमिति कायव्यूहमत आह पुनः कीदृशः पादाम्बुरुहं कमलचरणं धारयतीति धारिणी या ... सुतां लक्ष्मी तां अक्ष्णां शनैर्नेत्रैः सहस्रैर्दिदृक्षुर्द्रष्टुमिच्छुः लक्ष्मी

...तादि श्रीभोजदेवः पिता रामादेवी माता पाराशरादयः प्रियाः आशादि शिष्याः ॥७॥ प्रीतो राधासमागमात् आनन्दयुक्तः पीना

...भीषदासेन धीमता ॥ कारिता गीतगोविन्दटीकेयं सुखदा ध्रुवः ॥१॥ भीषदास नियुक्तेन कस्य पन्था प्रसेविना ॥

...लिपिनं चेन्मदीयं वै स्खलितं यस्या प्रमादतः ॥ न कर्त्तव्योम माक्षेपः गन्तुर्हि स्खलितं भवेत् ॥१॥ ॥ इति श्री

...कृत श्रीजयदेवकस्य पाराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥७॥

...रो नाम द्वादशः सर्गः ॥१२॥ श्रीभुवने[illegible] श्वर्यै नमः ॥ ॥

...श्रीभीषदास ... कारितायां पदद्योतनिकायां द्वादशः सर्गः ॥१२॥ श्रीभुवनेश्वर्यै नमः ॥ ॥८०॥

...दर्मलेखि जगन्नाथेन शर्मणा ॥ संवत्सरे वैक्रमाब्दे १९३९ शाके १८०४ सन १२८९ ॥

39

त गोविन्दः समाप्तः॥
राधा कृष्ण जीवको॥॥

40